॥ मलयमारुतः ॥

संस्कृतसाहित्ये विद्यमानानाममुद्रितानां

काव्य-रूपक-स्तोत्र-शतक-सुभाषितादीनां लघुग्रन्थानां

संग्रहः ।

तृतीयः स्पन्दः

राष्ट्रीयसंस्कृतसंस्थानीय-प्रकाशनसमित्यध्यक्षैः

डाक्टर् वे. राघवार्यैः

संपादितः

केन्द्रीयशिक्षामन्त्रालयाङ्ग-राष्ट्रीयसंस्कृतसंस्थानेन

प्रकाशितः

नवदेहली १९७३

22763

MALAYAMARUTA

A collection of minor works in Sanskrit
poems, plays, hymns, anthologies etc.

Part Three

Edited by

Dr. V. RAGHAVAN
Chairman, Publication Committee, Rashtriya Samskrita Samsthan, Ministry of Education and Social Welfare, New Delhi

Published by
THE RASHTRIYA SAMSKRITA SAMSTHAN
NEW DELHI
1973

Copyright : Rashtriya Sanskrit Samsthan, New Delhi
सर्वेऽधिकाराः स्वायत्तीकृताः

Price : Rupees Five
मूल्यम् - पञ्च रूप्यकाणि

भारती विजयम् प्रेस् , मद्रास्-600005

॥ मलयमारुतः ॥

संस्कृतसाहित्ये विद्यमानानाममुद्रितानां
काव्य-रूपक-स्तोत्र-शतक-सुभाषितादीनां लघुग्रन्थानां
संग्रहः ।

तृतीयः स्पन्दः

राष्ट्रीयसंस्कृतसंस्थानीय-प्रकाशनसमित्यध्यक्षैः
डाक्टर् वे. राघवार्यैः
संपादितः

केन्द्रीयशिक्षामन्त्रालयाङ्ग-राष्ट्रीयसंस्कृतसंस्थानेन
प्रकाशितः

नवदेहली १९७३

FOREWORD

The Rashtriya Sanskrit Sansthana is happy to publish the third volume of the *Malaya Māruta*, as originally designed by Dr. V. Raghavan when he was Chairman of the Kendriya Sanskrit Vidyapeetha, Tirupati. Dr. Raghavan has all along taken pains to ensure that the soothing and enlivening breeze of the 'Malaya Māruta' is made available to the scholarly world without any interruption. The first volume appeared in 1966 in which, apart from a few rare *Stotras* and *Subhāṣitas*, an unpublished 17th Century Sanskrit satire by Hari Jīvana Miśra, also appeared. The second volume was brought out in 1971 consisting of seven *Laghu Granthas* of which special mention may be made of the anonymous *Stotra* addresssd to Śiva, the *Cārucaryā* of the famous King Bhoja, Somanātha's *Anyokti-muktāvalī* and the one-act play *Bhojarājāṅka*.

The Vidyapeetha family has since grown in size and now we have five Kendriya Sanskrit Vidyapeethas at Tirupati, Delhi, Jammu, Allahabad and Puri, and the Rashtriya Sanskrit Sansthana represents a Central co-ordinating machinery for all the Vidyapeethas. It is a matter of great privilege for the Rashtriya Sanskrit

Sansthana to announce the publication of the third volume of the *Malaya Māruta*, which is now a common heritage of all the Vidyapeethas The Sansthana takes this opportunity to congratulate Dr. V. Raghavan for this unique contribution.

R. K. SHARMA

Officer on Special Duty (Sanskrit) Ministry of Education & Social Welfare and Director, Rashtriya Sanskrit Sansthana.

27—2—1973
NEW DELHI

आमुखम्

तृतीयोऽयं स्पन्दो मलयमारुतनाम्न्याः संस्कृतसञ्चिकायाः, यत्र अमुद्रिता लघ्व्यः कृतयः हस्तलिखितकोशेभ्य उद्धृत्य प्रकाशं नीयन्ते। तिरुप्पतितः पूर्वमाविर्भूतेयमितः तृतीयस्पन्दमारभ्य देहलीस्थराष्ट्रीयसंस्कृतसंस्थानद्वारा प्रकाशयिष्यते। अस्या अनुस्यूततया प्रकाशनकृतेऽपेक्षितं नूतनं संविधानं रचितवते रा. सं. संस्थानाय धन्यवादाः समर्प्यन्ते।

प्रकाशितचरे स्पन्दद्वये या प्रक्रिया उररीकृता तामेवानुसृत्य अस्मिन्नपि स्पन्दे अष्टौ लघुकृतयः पञ्चहस्तलिखितकोशागारेभ्य उद्धृताः प्रकाशिताः,—एकमुपक्रमोचितं स्तोत्रम्, एको योगानुभूतिविषयः शिवपार्वतीसंवादः, एका इस्लामियकथा पद्यबद्धा, द्वे खण्डकाव्ये, द्वौ सुभाषितसञ्चयौ, अन्त एकमेकाङ्कं प्रहसनं चेति। प्रहसनं मातृकाद्वयबलेन संशोध्य संपादितम्।

तत्र प्रतिग्रन्थमधो मातृकाविषयाः ग्रन्थ-तत्कर्तृविषयाः, पाठभेदाः, दुर्घटदुरूहपदपङ्क्तिविशदीकरणार्थाश्च लघ्व्यः टिप्पण्यो योजिताः।

ग्रन्थमातृकासंपादने उपकृतवद्भ्यः कोशागाराधिकृतेभ्यः, अन्येभ्यः सुहृद्भ्यः सहयोगिभ्यश्च कार्तज्ञ्यमाविष्क्रियते।

मद्रास्
२६-१-१९७३

वे. राघवः

PREFACE

The third volume of the *Malayamāruta* is coming out, according to the new arrangement, under the auspices of the Central Publication Committee of the *Rashtriya Sanskrit Samsthan* of the Ministry of Education, which is administering and co-ordinating the work of the *Kendrīya Samskrita Vidyā Pīṭhas*, the *Central Sanskrit Institutes*, whose number has now risen to five. The Editor is thankful for the arrangements made by the *Samsthan* for the continued publication of the *Malayamāruta*.

The present issue offers in print for the first time eight short works, whose manuscripts come from five different mss. libraries. Continuing the pattern of the previous two collections, this one also opens with a *Stotra*, this time one on Śiva, ascribed to the great patron, King Anup Singh of Bikaner, of the 17th century; the ms. of this text is from the Anup Library, Bikaner. Elsewhere[1] I have given a list of the works ascribed to Anup Singh and those produced by the large circle of poets and scholars who flourished in his court. The second work is a philosophical poem written as a dialogue between Pārvatī and Śiva, in a musical metre, and is preserved in a ms. in the Adyar Library, Madras. The third, the *Sulaimaccarita*, is on the story of the Biblical hero Solomon, son of David, but based here on the version handed down in Islamic tradition. The narrative is by Kalyāṇamalla, the author of *Anaṅgaraṅga*, patronised by Ladkhan of the Lodi family of Oudh of the 16th century A. D. This shows how later Sanskrit writers looked freely around and enriched their creative output with fresh themes taken from other literatures and cultures. The ms. of this work is preserved in the Government Oriental Mss. Library, Madras. The three short lyrics of Kṛṣṇa Kavi figuring next are again from the Adyar

1. See *New Catalogus Catalogorum*, Volume I, Revised edition, pp. 216-9.

Library mss.; nothing is known of the author but he seems to be a recent writer. The *Subhāṣitasudhānidhi* is an anthology represented by two mss., giving two recensions of the text, in the Madras Government Oriental Mss. Library; unfortunately, both the mss. have some gaps. The last work in the volume is a farce, *Palāṇḍumaṇḍana*, a satire on the eating habits and tastes of Pandits of different parts of India; the different varieties of onion, forbidden by *Śāstras* for orthodox consumption, provide the comic material for the poet who works out an entertaining farce, with the Pandits and their womenfolk contriving various sly methods to enjoy this delicacy. The author Harijīvana Miśra of the Jaipur court in the 17th century has already figured in the inaugural issue of the *Malayamāruta* in which his short play *Vibudhamohana* was published. The *Palāṇḍumaṇḍana*-farce given here was produced on the stage by the Editor under the auspices of the *Samskrita Ranga*, Madras and in the fourth issue of the *Samskrita Ranga Annual*, detailed accounts of the poet Harijīvana Miśra and his plays have been given by Dr. George Artola now of the University of Toronto and the Editor. The edition here of the *Palāṇḍumaṇḍana* has been made with two mss. of the work, one from Bikaner and another from the India Office, London; in the restoration of some of the Prākṛt passages, which are on the whole badly written in both mss., I have received the help of my friend Dr. A. N. Upadhye; my thanks are due to him. In view of the wider interest that this farce may evoke, a brief resume of it in English is added.

In the case of each text, as in the former issues, brief notes on the mss., acknowledgements to individuals and libraries for supplying the mss., notes on the works and authors, variants and explanations of difficult words and passages in the texts have been given.

Madras,
26-1-1973

V. RAGHAVAN

अनुक्रमणिका

श्रीसाम्बसदाशिवस्तवः-महाराजश्रीमदनूपसिंहविरचितः	....	१-७
शारदातिलकम्-श्रीपरमेश्वरयोगीन्द्रविरचितम्	....	८-२६
सुलैमचरित्रम्-श्रीकल्याणमल्लविरचितम्	....	२७-८५
कविकण्ठाभरणम्-श्रीकृष्णकविविरचितम्	....	८६-८८
मनोगर्हणम्-श्रीकृष्णकविविरचितम्	....	८९
प्रास्ताविकश्लोकाः-श्रीकृष्णकविविरचिताः	....	९०-९१
सुभाषितसुधानन्दलहरी	....	९२-११५
पलाण्डुमण्डनप्रहसनम्-हरिजीवनमिश्रविरचितम्	....	११६-१३९

॥ श्रीः ॥

॥ श्रीसाम्बसदाशिवस्तवः ॥ *

॥ महाराज-श्रीमदनूपसिंहविरचितः ॥

समस्तसामन्तशिरोमणीनां
भाभिर्विचित्राभिरलंकृताङ्घ्रिः ।
संराजतेऽनूपमरुक्षितीन्द्रो[1]
यशःप्रभाभानुविकासिताशः ॥ १ ॥

स सर्वशास्त्रार्थविलोडनोत्थ-
शिवाच्युताद्वैतनिविष्टबुद्धिः ।
नत्वा रमाकान्तमथाम्बिकेश-
स्तुतिं विधातुं वितनोति यत्नम् ॥ २ ॥

ब्रह्मादयोऽपि न बभूवुरलं भवन्तं
स्तोतुं तुरीय ! कथमत्र नरो वरः स्यात् ।
सत्येवमप्यथ शिव त्वयि भावबन्धा-
द्यद्वच्मि किञ्चिदिह तत् त्वमुरीकुरुष्व ॥ ३ ॥

---

*श्रीकुञ्जनराजमहाशयैः संगृहीतायाः बीकानीरस्थ-अनूप-पुस्तकालयस्थ-मातृका-प्रतिकृतेरुद्धृत्य प्रकाशितोऽयं स्तवः ।

१. अनूपसिंहो मरुक्षित्याख्य-बीकानीर-प्रदेशस्य महाराजः (१६०४-१७०९)

[२]बर्हिर्मुखासुरविचित्रमहार्हमौलि-
रत्नप्रभाप्रतिफलच्छविपाद[३]मेव ।
उद्यत्सहस्ररविदीप्तिनिरन्तरं मे
स्वान्ते चकास्तु भवतश्चरणारविन्दम् ॥ ४ ॥

चन्द्रार्धभूषितविशालललाटदेशे
क्षोणीधरेन्द्रतनयाहृतवामदेहे ।
हित्वैव संसृतिसुखं परिणामदुःखं
स्वान्तं मदीयमनिशं रमतां त्वयीश ॥ ५ ॥

शंभो त्वदीयचरणार्हणया कृतार्थ-
स्त्वत्तोऽन्यतः किमपि वाञ्छितमर्थये न ।
आह्लादितः कुमुदिनीपतिना जनोऽयं
तारान्तरं क इह कामयते हि कामी ॥ ६ ॥

अष्टौ विभूतय इमाः परिचारिकाव-
त्कल्याणतैलपरिपूरितदीपिकाभिः ।
भक्तस्य खण्डपरशो ! नियतं हृदिस्थं
नीराजयन्ति न हि किं तव पादयुग्मम् ॥ ७ ॥

काले विनष्टसकले प्रकृतौ विलीनान्
भूयोऽगुणः सगुण एव भव(न्) ....[४] ।
ब्रह्माच्युतेशविबुधान्परमे(मिः)च्छयैव
क्रीडां तुरीय[५] ! सममम्बिकया तनोषि ॥ ८ ॥

---

२. देवैरसुरैश्चोपास्यः शिवः । ३. पादाः किरणाः ।
४. 'सृजंस्त्वम्' इत्यत्र लुप्तो भागः स्यात् ।
५. मूर्तित्रयान्तर्भूतात् शिवात्परः, तत एव तुरीयः शिवं इत्यर्थः ।

ब्रह्माण(ण्ड)संघविरतौ विरतिं प्रयाति(न्ति)
ब्रह्माच्युतेशसहितास्त्रिदशाः परेश ।
नासीदृशस्त्वमत एव पुराविदस्त्वां
नाम्ना सदाशिवमिति प्रवदन्ति नित्यम् ॥ ९ ॥

ये त्रासिताः सुमनसो विधिवि (ष्णुमुख्याः?)
हालाहलेन जलधौ सति मथ्यमाने ।
तेषां विपत्तिमवलोक्य तया सहैनं[६]
गौरीपते त्वमपि(बः, त)व कोऽस्ति तुल्यः ॥ १० ॥

क्षोणी रथः पशुपते श्रुतयस्तुरङ्गाः
सूतो विधिर्धनुरगेन्द्र इषुर्मुकुन्दः ।
एवं विधिस्त्रिपुरदाहविधौ किमर्थं
जाने न भालनयने सति दाहदक्षे ॥ ११ ॥

श्रीवीरभद्र इति नाम गणस्तवेश
दक्षाध्वरे विबुधपार्श्वचरं त्रिशूली ।
....
वक्तुं परं क इयदेव भवेत्समर्थः ॥ १२ ॥

कालेन तीक्ष्णशतपाशनिबद्धदेहं
श्वेतं नृपं त्वयि समर्पितचित्तवृत्तिम् ।
मृत्योरमोचय इति प्रसभं दयालो
मृत्युञ्जयं किल भवन्तमुदाहरन्ति ॥ १३ ॥

हन्तुं हिरण्यकशिपुं धृतसिंहरूप-
श्चिक्षेप दिक्करिषु यत्करजानि विष्णुः ।

---

६. हालाहलं विषम्

क्षुब्धं जगत्तदिति वीक्ष्य भवांस्तदोजः
क्षीणं चकार कलयन् शल(र)भावतारम् ॥ १४ ॥

भस्मासुरात्तव भयं प्रवदन्ति मन्दा-
स्तद्युक्तिमन्न हि परेश यदात्मनैव ।
संवर्धितो विषतरुः कथमात्मनैव
च्छेत्तव्यमि(इ)त्यसुमुपेक्षितवान्मु(पु)रारिः[७] ॥ १५ ॥

केचिद्वदन्ति हरिणानुकृता[८] मृगाक्षीं
संमोहितस्त्वमिति तत्स्तुतिमात्रमस्य ।
यत्कामनिर्दहनदक्षतृतीयनेत्रे
संभाव्यते कथमपीदमनङ्गशत्रौ ॥ १६ ॥

वादे विरिञ्चिपुरुषोत्तमयोः प्रवृत्ते
ज्येष्ठावरत्वविषये विधिना तटस्थः ।
आक्रोशितस्त्वमिति पञ्चममास्यमस्य
श्रीभैरवः किल भवन्नहरो नखेन ॥ १७ ॥

सेव्यो मुकुन्द इह नान्य इति प्रशंसन्
श्रीनैमिषे मुनिसुतैरपि नादृतो यः ।
....
व्यासस्तवैव महिमानमुदाजहार ॥ १८ ॥

व्यामोहितं मधुमथा[९] निजमायया हि
खिन्नं मृकण्डुजमवेक्ष्य भवान् भवान्वा(या) ।

---

७. मन्दस्मितेनैव पुरत्रयं भस्मीकृतवतः कथं भस्मासुराद्भयमिति तात्पर्यम् ।

८. मोहिनीरूपिणीं स्त्रियमनुकृता अनुकृतवता विष्णुना । अयं भस्मासुरकथान्तर्भूतो वृत्तान्तः । ९. मधुं मथ्नातीति मधुमथ् तेन, विष्णुना ।

उद्धारयैनमिति भाषित आर्यबन्धो
मोहं जहार किल तस्य हृदि प्रकाशन्(शः)[१०] ॥ १९ ॥

[११]द्विघ्नाब्जपञ्चशतकेन विधाय तेऽर्चा-
मेकेन तत्र रहिते तु यदा दृगब्जम् ।
उद्धृत्य चार्पितवते हरये तदा त्वं
तुष्टः सुदर्शनमदाः शितिकण्ठ चक्रम् ॥ २० ॥

आस्थाय नी(की)लगिरि[१२]मुग्रसमाधिना य-
स्त्वां तोषयन्नथ वरास्त्रमगाद् भवत्तः ।
भीष्मेण सार्धमखिलं कुरुसैन्यमेको
लोकान्तरं किल निनाय रणात्स पार्थः ॥ २१ ॥

यज्ञं त्वया रहितमीक्ष्य दधीचिनादौ[१३]
धिक्कारितस्स शिव दक्षमुनिः[१४] परेशम् ।
यत्त्वां निनिन्द वचसा श्रुतिशङ्कुनेव
तस्यैव बर्करमुखं[१५] फलमाप सद्यः ॥ २२ ॥

मोहादिभिर्विषयपाशशतैर्निबध्य
संसृत्युदन्वति निमज्जितमात्मसंस्थैः[१६] ।
कस्त्वद्विनाऽन्य इह देवगणस्ततो मा-
मुद्धारयेदिति निरन्तरमाश्रये त्वाम् ॥ २३ ॥

---

१०. अत्र द्रष्टव्यं श्रीमद्भागवतम् १२. ११.
११. द्विघ्नं द्विगुणितम् ।
१२. कीलगिरिरिति इन्द्रकीलगिरेर्नामैकदेशः ।
१३. द्रष्टव्यं वायुपुराणम् ३०, १०३-६
१४. दक्षप्रजापतिः
१५. बर्करश्छागः ।
१६. आत्मनि मय्येव वर्तमानैर्मोहादिभिरिति अन्वयः ।

ऐश्वर्यभावमदगर्वितचेतसोऽन्ये
देवा न सन्ति कति वा प्रलयाभिभूताः ।
यो हृत् सकृत्त्वयि निधाय शिव प्रसीदे-
त्युच्चैर्ब्रवीति स पुनः स्थिरसिद्धिरेकः[१७] ॥ २४ ॥

दासस्तवायमिदमर्थयतेऽनिशं त्वां
येषां न चासि कुलदैवतमीश्वर त्वम् ।
तेषां वचोभिरपि मे वचसां समूहो
युक्तः कदापि भव[तु]मा विमलोह्य(लोऽस्त्व)निष्टैः[१८] ॥ २५ ॥

विश्वोद्भवावनविनाशन सत्यरूप
प्रद्योतनेन्दुदहनैः प्रथितं त्रिलोक्याम् ।
नेत्रत्रयं त्रितयजुष्ट[१९]मनारतं मे
निःश्रेयसाय कलये हृदये कपर्दिन् ॥ २६ ॥

वासो दिगेव फणिनस्तव भूषणानि
भस्मैव लेपनमथो वसतिः श्मशानम् ।
एतादृशोऽपि सकलस्य चराचरस्य
कामान्प्रपूरयसि नित्यमतो भजे त्वाम् ॥ २७ ॥

प्रहितं हितमेव यत् त्वयेश (शा)[२०]
सहितं, त्वद्रहितं हितं न सम्यक् ।

---

१७. 'स्थिरसिद्धिरेकः' इति मातृकायाम् ।

१८. मातृकास्थितस्य पादस्य एकाक्षराधिक्यम् । हे भव तेषामनिष्टैर्वचोभिर्मे विमलो वचसां समूहो युक्तो मास्तु । तैः संकथापि मास्त्वित्यर्थः ॥

१९. त्रितयं पूर्वोक्तविश्वोद्भव-अवन-नाशन-कर्मत्रयम् ।

२०. इशा ईशेन ।

इति निश्चितचेतसस्त्वदीय-
स्मृतिशून्या त्रुटिरप्यु(प ?)पैतु नो मे ॥ २८ ॥

प्र(अ)नुदिनमिदमेकमर्थये त्वां
भव भवतापहरं तवाभिधेयम् ।
अपसरतु न मे मुखात्कदापि
क्वचिदपि संसृतितापिनो[२१]ऽनुकम्पिन् ॥ २९ ॥

शंभो तिष्ठतु यातु वाद्य सकलं मायाकृतं नाग्रह-
स्तत्राऽस्तीह परं त्वनेकभुवनाधीशं तुरीयाभिधम् ।
साम्बं तत्पदवाच्यमीशमनघं शंभुं भवन्तं शिवं
मुक्त्वा नान्यमुपाश्रये न च नमस्कुर्वे न च प्रार्थये ॥ ३० ॥

अनूपसिंहभूपालप्रणीतेन सदाशिवः ।
स्तवेनानेन तुष्टो नः श्रेयो दिशतु शाश्वतम् ॥ ३१ ॥

॥ इति श्रीमत्सकलसामन्तभूपचूडामणिनीराजितचरणसरोरुह-श्रीशिव-केशवाद्वैताभिनिविष्टभारतीविभव-श्रीमदनूपसिंहधरणीपालविरचितः साम्बसदाशिवस्तवः समाप्तिमगमत् ॥

---

२१. संसारतापवतो मे इत्यन्वयः।

॥ शारदातिलकम् ॥*

॥ श्रीपरमेश्वरयोगीन्द्रविरचितम् ॥

श्रीमति शोभनकैलासोपरि शीतलतल्पशयाना[1] ।
भूमसुखानुभवानन्दात्सुखबोधकमाह रहस्ये ॥ १ ॥

शंकर शंकर कारुण्यार्णव सत्यसुखं किमु देव ।
शिव सत्यसुखं किमु देव ॥
शंकरि शंकरि संभोगादपि सारमिदं ननु देवि ।
अयि सारमिदं ननु देवि ॥ २ ॥

सारमिदं यदि तत्किं शंकर सम्यगुदीरय देव ।
शिव सम्यगुदीरय देव ॥
कारणकारणरूपे स्वात्मनि कामरतिर्ननु देवि ।
अयि कामरतिर्ननु देवि ॥ ३ ॥

कामरताविह साक्षी को वद कालमदापह देव ।
शिव कालमदापह देव ॥
सोमकलामयि नान्यत्पश्यति सोऽद्वय एव तदानीम् ।
अयि सोऽद्वय एव तदानीम् ॥ ४ ॥

सोऽनितरोऽस्तु कथं तत्सिध्यति सोमकलाधर देव ।
शिव सोमकलाधर देव ॥
मानिनि सद्गुरुरेतज्जल्पति मा भ्रमसीह तदानीम् ।
अयि मा भ्रमसीह तदानीम् ॥ ५ ॥

---

* अडयार्-पुस्तकालयस्थायाः ६१२० - अङ्कभृतस्तालपत्रमातृकाया उद्धृतम् ।
१. शयाना, शयानः इति पाठद्वयमुपलभ्यते ।

सद्गुरुरेव स कीदृक्सुन्दर सत्यमुदीरय देव ।
शिव सत्यमुदीरय देव ॥
सद्गुरुरञ्चति सच्चिन्मातृकसाक्ष्यहमित्यनुभूतिम् ।
अयि साक्ष्यहमित्यनुभूतिम् ॥ ६ ॥

भानमयेऽत्र स येनानन्दति भद्रमिदं वद देव ।
शिव भद्रमिदं वद देव ॥
ज्ञानमिहास्ति निदानं सुन्दरि नर्मविलासविनोदे ।
अयि नर्मविलासविनोदे ॥ ७ ॥

तद्वद नायक लीलाकौतुकताण्डवपण्डित देव ।
शिव ताण्डवपण्डित देव ॥
सद्वचनं गुरुमूर्तिं तं भज सल्युपदेशमुपैषि ।
अयि सल्युपदेशमुपैषि ॥ ८ ॥

नायक सद्गुरुमूर्तिर्दीव्यसि नाम महावटमूले[1] ।
शिव नाम महावटमूले ॥
ज्ञेयमिदं शृणु चिन्मुद्रां भज नेह तदन्यदपर्णे ।
अयि नेह तदन्यदपर्णे ॥ ९ ॥

भावमुदीरय तस्याः शंकर भास्करकोटिसमान ।
शिव भास्करकोटिसमान ॥
भावय मौनमिति ज्योतिर्मयभानमयं हृदि देवि ।
अयि भानमयं हृदि देवि ॥ १० ॥

कुत्र तदीश्वर तेजो दर्शय कोमलचन्द्रवतंस
शिव कोमलचन्द्रवतंस ।

---

१. दक्षिणामूर्तिरूपेण

चित्रमिदं सलिले ज्योतिर्मम चित्तविनोदनशीले ।
[अयि]मम चित्तविनोदनशीले ॥ ११ ॥

वारिपदं किमु साक्षाद्दर्शय वासुकिभूषण देव ।
शिव वासुकिभूषण देव ।
गौरि महेश्वरि नासाग्रोपरि गोचरमागमसूक्ष्मम् ।
अयि गोचरमागमसूक्ष्मम् ॥ १२ ॥

खेचरनामकमुद्रां केचन केवलमाहुरिदं किम् ।
शिव केवलमाहुरिदं किम् ।
लोचनगोचरमेतन्मानिनि लोलदिवाकरगुप्तम् ।
अयि लोलदिवाकरगुप्तम् ॥ १३ ॥

लोलदिवाकरकान्तिः सा किल लोकजनैः किमदृष्टा ।
शिव लोकजनैः किमदृष्टा ।
मूलकवाटविभेदे पश्यसि मुक्तिसुती ननु सैव ।
अयि मुक्तिसुती ननु सैव ॥ १४ ॥

शङ्कुसमोपरि पुच्छग्राह्यहिसाम्यमिदं किमु देव ।
शिव साम्यमिदं किमु देव ।
कुङ्कुमदीधितिमूलाधारगकुण्डलिनी किल देवि ।
अयि कुण्डलिनी किल देवि ॥ १५ ॥

मेरुनिकाशसुषुम्णां दर्शय मेनकया कृतपूज ।
शिव मेनकया कृतपूज ॥
भीरु महोन्नतवीणादण्डकभीमनिबद्धतनुः सा ।
अयि भीमनिबद्धतनुस्सा ॥ १६ ॥

इन्दुदिवाकरमध्ये मण्डलमीश्वर चित्रमिदं किम् ।
शिव ईश्वर चित्रमिदं किम् ॥
बिन्दुकलाभिधनादास्तान्यपि भेदवचोगदितानि ।
अयि भेदवचोगदितानि ॥ १७ ॥

काः सहयार्चित(?) नाडीः संप्रति कल्पनया कथयन्ति ।
शिव कल्पनया कथयन्ति ॥
श्वासपथायितनाडीत्रय्यपि शब्दविशेषविचित्रा ।
अयि शब्दविशेषविचित्रा ॥ १८ ॥

भानमयार्थविवेकं दर्शय भ(फ)क्किकया हृदि जाने ।
शिव भ(फ)क्किकया हृदि जाने ॥
पीनकुचे शृणु भानौ जाग्रति पिङ्गलया भ्रमयन्ति ।
अयि पिङ्गलया भ्रमयन्ति ॥ १९ ॥

शूलधरेश्वर मृत्योर्वारण सूक्ष्ममिदं किमु देव ।
शिव सूक्ष्ममिदं किमु देव ॥
कालनिवारण काले तच्छिव कामिनि भिन्धि पिधानम् ।
अयि कामिनि भिन्धि पिधानम् ॥ २० ॥

छादनमस्ति यदीदं केश्वर शंस दयामय मूर्ते ।
शिव शंस दयामय मूर्ते ॥
नादगुहागतमेतद्भावय नाकपदं ननु देवि ।
अयि नाकपदं ननु देवि ॥ २१ ॥

हस्ततलामलकाभं दर्शय हार्दगुहास्थसुषुम्नाम् ।
शिव हार्दगुहास्थसुषुम्नाम् ॥

मस्तकमञ्चति नाडी सा किल मन्दरपर्वतमूले ।
अयि मन्दरपर्वतमूले ॥ २२ ॥

त्र्यम्बक मोहयसीत्थं भञ्जय तापमपारकृपाब्धे ।
शिव तापमपारकृपाब्धे ॥

किं बहुना शृणु तद्भ्रूमध्यमकीकस[1]मार्गमवेहि ।
अयि कीकसमार्गमवेहि ॥ २३ ॥

केन महानट तादृक्सिध्यति केवलमस्ति तदभ्रम् ।
शिव केवलमस्ति तदभ्रम् ॥

मानसमात्रनिरूप्यं भावय माधवसोदरि देवि ।
अयि माधवसोदरि देवि ॥ २४ ॥

शब्दविशेषविमोही को वद शास्त्रपथे तदवैति ।
शिव शास्त्रपथे तदवैति ॥

अब्दशतं गुरुसेवी पश्यति यावकरञ्जितपादे ।
अयि यावकरञ्जितपादे ॥ २५ ॥

द्वादशकाङ्गुलिगामी नश्यति दर्शय यावदयं वा ।
शिव दर्शय यावदयं वा ॥

वादविनोदिनि हित्वा गच्छति वायुरयं चतुरोऽपि ।
अयि वायुरयं चतुरोऽपि ॥ २६ ॥

तर्हि तदंशकलाभे कारणतन्त्रमुदीरय देव ।
शिव तन्त्रमुदीरय देव ॥

बर्हिकलापककेशे मूलकबिन्दुपदं ननु देवि ।
अयि बिन्दुपदं ननु देवि ॥ २७ ॥

---

1. कीकसमस्थि ।

बिन्दुपदं ननु तन्मे वञ्चसि बिल्वदलार्चनतुष्ट ।
शिव बिल्वदलार्चनतुष्ट ॥
इन्दुमुखीदृशि किं वा मुह्यसि एकमिदं ननु मौनम् ।
अयि एकमिदं ननु मौनम् ॥ २८ ॥

का परमेश्वर काशी बोधय कञ्जभवार्चितपाद ।
शिव कञ्जभवार्चितपाद ॥
पापविनाशनमेतत्केचन पार्वति सत्यमुशन्ति ।
अयि पार्वति सत्यमुशन्ति ॥ २९ ॥

जीवचिदीश्वरचिद्भेदं वद जैत्रधनुर्धर देव ।
शिव जैत्रधनुर्धर देव ॥
केवलमेव हि मायामात्रक केतुगृहीतसमानम् ।
अयि केतुगृहीतसमानम् ॥ ३० ॥

भेदमुदीरय मायायाः किमु भीम तयोरतिदूरम् ।
शिव भीम तयोरतिदूरम् ॥
सीदति कश्चिदविद्याबन्धनसेतुमतिक्रमितुं हि ।
अयि सेतुमतिक्रमितुं हि ॥ ३१ ॥

स्वर्णमहीधरचापालंकृतसूत्रधरं वद देव ।
शिव सूत्रधरं वद देव ॥
कर्णदृगाननननासासप्तक कारणनाट्यकृदस्ति ।
अयि कारणनाट्यकृदस्ति ॥ ३२ ॥

सिद्धनिषेवितपादालंकृतशेष स कीदृशरूपी ।
शिव शेष स कीदृशरूपी ॥

शुद्धचिदम्बरमध्ये नृत्यति सोऽपि सभापतिरूपी।
अयि सोऽपि सभापतिरूपी ॥ ३३ ॥

मुख्यतया परिवारास्ते कति मोक्षपदायनदर्शिन्।
शिव मोक्षपदायनदर्शिन् ॥
सौख्यविनोदनशीले चिन्तय सन्ति परा ननु पञ्च।
अयि सन्ति परा ननु पञ्च ॥ ३४ ॥

कः प्रथमो वद मार्गे दीव्यति कास्य वधूरपि देव।
शिव कास्य वधूरपि देव ॥
वप्रतटेऽस्ति स विघ्नेशो मम वल्लभया सह मूले।
अयि वल्लभया सह मूले ॥ ३५ ॥

पूर्ववदेव गणाधीशोपरि पुण्यपदे वद कोऽस्ति।
शिव पुण्यपदे वद कोऽस्ति ॥
सर्वजनोद्भवकारुस्तिष्ठति साकमजः सखि वाण्या।
अयि साकमजः सखि वाण्या ॥ ३६ ॥

कः श्वसनायननाड्यां कोपरि कर्म भयापह देव।
शिव कर्म भयापह देव ॥
विश्वमयो मणिपूरे क्रीडति विष्णुरयं सह लक्ष्म्या।
अयि विष्णुरयं सह लक्ष्म्या ॥ ३७ ॥

चक्रधरोपरि को वा बोधय चारणगीतविलास।
शिव चारणगीतविलास ॥
शक्रमुखनपि रुद्रः पार्वति शास्ति महान्सह काल्या।
अयि शास्ति महान् सह काल्या ॥ ३८ ॥

रुद्रपदोर्ध्वविशुद्धौ को हर रोगविमर्दनपाद ।
शिव रोगविमर्दनपाद ॥
भद्रमयः स महेश्वर्या सह भाति महेश्वरनामा ।
अयि भाति महेश्वरनामा ॥ ३९ ॥

व्याघ्रपतञ्जलिदृश्यः संसदि वर्तत एवममेय ।
शिव वर्तत एवममेय ॥
शीघ्रमहं तु मनोन्मन्यास्तव चित्तविमोहिनटोऽस्मि ।
अयि चित्तविमोहिनटोऽस्मि ॥ ४० ॥

किं पुनरूर्ध्वममेयं व्योमनि कीर्तय केशवपूज्य ।
शिव कीर्तय केशवपूज्य ॥
कम्पनमेव महाम्भोदध्वनिकम्बुगले तदपारम् ।
अयि कम्बुगले तदपारम् ॥ ४१ ॥

क्षुत्परिहारनिदानं किं वद सुन्दर सत्यसमाधौ ।
शिव सुन्दर सत्यसमाधौ ॥
तत्परिपक्वसुधासारक्षति तादृशदिव्यशरीरम् ।
अयि तादृशदिव्यशरीरम् ॥ ४२ ॥

कानि पदानि दलानां कीर्तय काञ्चनपर्वतचाप ॥
शिव काञ्चनपर्वतचाप ॥
तानि चतूरसपङ्क्तिद्वादशतत्स्वरनेतृदलानि ।
अयि तत्स्वरनेतृदलानि ॥ ४३ ॥

मामिह पालय मायावारणमन्त्रमुदीर्य तदीयम् ।
शिव मन्त्रमुदीर्य तदीयम् ॥
ओमिति पञ्च च वर्णान्पार्वति उच्चर शुद्धमनास्त्वम् ।
अयि उच्चर शुद्धमनास्त्वम् ॥ ४४ ॥

तत्पदसाधकमेकं नायक तन्त्रमुदीरय सूक्ष्मम् ।
शिव तन्त्रमुदीरय सूक्ष्मम् ॥
सोत्पथमर्त्यसुदूरं श्रोष्यसि शोभनमानय कर्णम् ।
अयि शोभनमानय कर्णम् ॥ ४५ ॥

ईदृशमस्ति रहस्यं देशिक एतदनन्यनिरूप्यम् ।
शिव एतदनन्यनिरूप्यम् ॥
तादृशमेव विरक्त्या सिध्यति तापसदूरमदूरम् ।
अयि तापसदूरमदूरम् ॥ ४६ ॥

तन्त्रगुरोर्निजरूपं दर्शय तत्त्वविदामुपदेश्यम् ।
शिव तत्त्वविदामुपदेश्यम् ॥
मन्त्ररहस्यमिदं तच्छंकरि मनसि विचारय बीजम् ।
अयि मनसि विचारय बीजम् ॥ ४७ ॥

बीजमिदं यदि तद्योनिः किमु बीजमयाखिलरूप ।
शिव बीजमयाखिलरूप ॥
हे जगतीमयि भवतीं भावय हेममहीधरभूषे ।
अयि हेममहीधरभूषे ॥ ४८ ॥

शंकर नाथ तदेवं सिध्यति शक्तिशिवात्मकमेव ।
शिव शक्तिशिवात्मकमेव ॥
किं करणं पुनरन्यच्छंकरि केवलदम्पतितोऽपि ।
अयि केवलदम्पतितोऽपि ॥ ४९ ॥

दम्पतिभावमनेकेष्वीरय देव दयामयमूर्ते ।
शिव देव दयामयमूर्ते ॥
किं परतो मृदुकठिनाभ्यामपि केशजितान्धतमिस्रे ।
अयि केशजितान्धतमिस्रे ॥ ५० ॥

नादमयं वद लोकाधीश्वर नामपरानुभवं मे ।
शिव नामपरानुभवं मे ॥
भेदनवेदिनि मृन्मांसत्वचभेदत एव निरूप्यम् ।
अयि भेदत एव निरूप्यम् ॥ ५१ ॥

बिन्दुमयं वद लोके नायक बीजरहस्यनिदानम् ।
शिव बीजरहस्यनिदानम् ।
किं दुरवापमवैषि प्रस्तरकीकसदारुविकारम् ।
अयि कीकसदारुविकारम् ॥ ५२ ॥

सर्वपदेष्वपि सर्वस्वं किमु सादरमीरय शंभो ।
शिव सादरमीरय शंभो ।
पर्वतपुत्रि सुसारं चिन्तय पावकवत्परवस्तु ।
अयि पावकवत्परवस्तु ॥ ५३ ॥

दारुशिलादिषु वह्निवदीश्वर दर्शयसीरितमेवम् ।
शिव दर्शयसीरितमेवम् ॥
भीरु तिलेष्विव तैलं चिन्तय भेदमपास्य तदेकम् ।
अयि भेदमपास्य तदेकम् ॥ ५४ ॥

ब्रह्म यदस्ति तदेकं नायक बद्धमभूदनयैव ।
शिव बद्धमभूदनयैव ।
सिह्मकटीदृशबन्धादेव हि सिद्ध्यति भक्तजनानाम् ॥
अयि सिद्ध्यति भक्तजनानाम् ॥ ५५ ॥

तत्त्वमुदीरय विष्ण्वादित्रयतारगुणत्रयजातम् ।
शिव तारगुणत्रयजातम् ।

सत्त्वरजस्तम इत्याकल्पय स त्रिविधं पुनरेकम् ।
अयि स त्रिविधं पुनरेकम् ॥ ५६ ॥

दृष्टमनश्वरमाकल्पावधि देव निरूपय वस्तु ।
शिव देव निरूपय वस्तु ।
मृष्टमिदं जलमृद्भावत्रयमेव तदीश्वरि पश्य ॥
[अयि] त्रयमेव तदीश्वरि पश्य ॥ ५७ ॥

सत्यमिदं हृदि जाने दर्शय साररसत्रयजातम् ।
शिव साररसत्रयजातम् ।
मत्यनुकूलिनि गङ्गां त्वामपि मामपि चिन्तय मूलम् ।
अयि मामपि चिन्तय मूलम् ॥ ५८ ॥

गङ्गां मूर्धनि धृत्वा नृत्यसि गायसि नाथ तया किम् ।
शिव गायसि नाथ तया किम् ।
गङ्गामीक्षय दीक्षां पार्वति केवल्योरनयोस्त्वम् ।
अयि केवल्योरनयोस्त्वम् ॥ ५९ ॥

वर्णमुदीरय तस्यास्तस्य च वज्रधरार्चितपाद ।
शिव वज्रधरार्चितपाद ।
स्वर्णरुचे शृणु शुक्लादीश्वरि शोणिततोऽपि परं किम् ।
अयि शोणिततोऽपि परं किम् ॥ ६० ॥

रूपमुदीरय साक्षादुत्तमरुद्र रसातिरसस्य ।
शिवरुद्र रसातिरसस्य ।
नापरमस्ति विवेकाच्चिन्तय नाम्बुनि तल्लवणं किम् ॥
अयि नाम्बुनि तल्लवणं किम् ॥ ६१ ॥

तत्र निदर्शनमास्ते हा किमु तथ्यमिदं नरजन्म ।
शिव तथ्यमिदं नरजन्म ।
चित्रमिदं सति देवो मुह्यति चेन्मनुजाः किमुशन्ति ।
अयि चेन्मनुजाः किमुशन्ति ॥ ६२ ॥

ईप्सुरहं पुनरेतदनश्वरमित्थमभूत्कथमीश ।
शिव इत्थमभूत्कथमीश ॥
अप्सु ज्योतिरथापो ज्योतिषि अस्ति ततोऽमृतमेकम् ।
अयि अस्ति ततोऽमृतमेकम् ॥ ६३ ॥

अन्योन्यं बहुवैरे सत्यपि आर्य तयोः कथमेवम् ।
शिव आर्य तयोः कथमेवम् ।
अन्योन्यं यदि मैत्री सिद्ध्यति अम्बु ततोऽमृतमेव ।
अयि अम्बु ततोऽमृतमेव ॥ ६४ ॥

दिङ्मात्रं वद सर्वं वेद्म्यथ देहमिदं कथमस्ति ।
शिव देहमिदं कथमस्ति ॥
त्वङ्मांसासृङ्मेदोऽस्थ्याद्यपि तरुमनुजादिषु पश्य ।
अयि तरुमनुजादिषु पश्य ॥ ६५ ॥

अङ्गादङ्गात्संभवसीत्यपि आम्नायेषु किमुक्तम् ।
शिव आम्नायेषु किमुक्तम् ॥
सङ्गानुक्रमजाताच्छंकरि सर्वस्वान्ननु जन्म ।
अयि सर्वास्वान्ननु जन्म ॥ ६६ ॥

भावितकारणगङ्गादित्रयभानपदं वद देव ।
शिव भानपदं वद देव ॥

देवि तदीरितमेकलैव हि देवरहस्यमवेहि ।
अयि देवरहस्यमवेहि ॥ ६७ ॥

एकत्रेति कथं वा दर्शय एतदतीव विचित्रम् ।
शिव एतदतीव विचित्रम् ॥

लोकनिवेदितमस्यास्ते मम लोकस्वाद्रिनिवासम् ।
अयि लोकस्वाद्रिनिवासम् ॥ ६८ ॥

हन्त निवेदयसीत्थं देशिक हास्यकृदन्यदुदीर्णम् ।
शिव हास्यकृदन्यदुदीर्णम् ॥

किं तरुणि त्रपसे त्वं संप्रति कीर्तय शून्यमपीति ।
अयि कीर्तय शून्यमपीति ॥ ६९ ॥

शून्यमितीरिण[1]मित्याद्युक्तिषु शोचति भक्तजनस्ते ।
शिव शोचति भक्तजनस्ते ॥

मान्यमशेषसुराद्यैर्भावय मानिनि तं भुवि सिद्धम् ।
अयि मानिनि तं भुवि सिद्धम् ॥ ७० ॥

सिद्धजनाः शिव कल्पादेव हि सिद्धिमुपेत्य रमन्ते ।
शिव सिद्धिमुपेत्य रमन्ते ॥

बद्धमिदं शिव कल्पाख्यं भुवि बालजना न विदन्ति ।
अयि बालजना न विदन्ति ॥ ७१ ॥

का भुवि नायक संजीविन्यपि कामरिपो कथयस्व ।
शिव कामरिपो कथयस्व ॥

सा भुवने शिवगङ्गेत्यात्मनि सत्यमवेह्यनसूये ।
अयि सत्यमवेह्यनसूये ॥ ७२ ॥

---

१. 'ईरिणं शून्यमूषरम्' इत्यमरः ।

लीयन्ते तरुवल्याद्योषधिलीलाः कुत्र तवेश ।
शिव लीलाः कुत्र तवेश ॥
जायन्ते भुवि यत्रात्रेत्यपि जाये किं वचनीयम् ।
अयि जाये किं वचनीयम् ॥ ७३ ॥

अस्यामेव हि सर्वेषामपि आत्मरसोऽस्ति पुराण ।
शिव आत्मरसोऽस्ति पुराण ॥
तस्या नादविवेके सत्यथ तापमपास्य रमन्ते ।
अयि तापमपास्य रमन्ते ॥ ७४ ॥

सत्यानन्दक सिद्धार्थं वद सन्तु वचांसि बहूनि ।
शिव सन्तु वचांसि बहूनि ॥
क्षित्यामम्बु जलेऽग्निस्तिष्ठति षिद्गजनो नहि वेत्ति ।
अयि षिद्गजनो नहि वेत्ति ॥ ७५ ॥

वारिज्योतिषि वायुं दर्शय वासवपूजितपाद ।
शिव वासवपूजितपाद ॥
गौरि किमत्र न शब्दादीन्यवगच्छेश्चूर्णशिलायाम् ।
अयि अवगच्छेश्चूर्णशिलायाम् ॥ ७६ ॥

[1]वरुणस्यापः पल्लय आसन्वह्निरिमाश्चकमे किम् ।
शिव वह्निरिमाश्चकमे किम् ॥
तरुणि विराडपि जायेतेत्यनुतापादप्सु स रेमे ।
अयि तापादप्सु स रेमे ॥ ७७ ॥

[2]तद्धि हिरण्यमभूदित्यागमतत्त्वविदो विवदन्ते ।
शिव तत्त्वविदो विवदन्ते ॥

---

१. तैत्तिरीयसंहिता ५.५.४.
२. तै. सं. ६.१.७.

बुद्धिमतैव तदालोच्यं हृदि बोधय नैव रहस्यम् ।
अयि बोधय नैव रहस्यम् ॥ ७८ ॥

यस्तु हिरण्यस्योत्पत्तेरपि यन्ता तेन किमात्तम् ।
शिव यन्ता तेन किमात्तम् ॥
वस्तु स सर्वं वेदेत्यागमवाक्यमिहास्ति हि मानम् ।
अयि वाक्यमिहास्ति हि मानम् ॥ ७९ ॥

एवं पञ्चीकरणाद्देशिक एतदशेषनिदानम् ।
शिव एतदशेषनिदानम् ॥
दैवं बीजवदविकारं भज देवि परं ब्रह्मेति ।
अयि देवि परं ब्रह्मेति ॥ ८० ॥

ब्रह्माण्डाभिधभूगोलस्य हि बीजमिदं वदसीव ।
शिव बीजमिदं वदसीव ॥
सिंहारोहिणि तद्देहं यदि सिद्ध्यति दृष्टवदेव ।
अयि सिद्ध्यति दृष्टवदेव ॥ ८१ ॥

दृष्टस्यास्य तु जगतो बीजं दृष्टं स्यादिति वाऽऽत्थ ।
शिव दृष्टं स्यादिति वाऽऽत्थ ॥
दृष्टानामिह वृक्षाणां किमु देवि न पश्यसि बीजम् ।
अयि देवि न पश्यसि बीजम् ॥ ८२ ॥

दृष्टेर्गोचरमेतत्स्यादिति देव न सन्ति वचांसि ।
शिव देव न सन्ति वचांसि ॥
सृष्टेरादावप एवेत्यपि शास्त्रं मानवमस्ति ।
अयि शास्त्रं मानवमस्ति ॥ ८३ ॥

किं बीजाङ्कुरन्यायादीश्वर कीर्तितमागमतत्त्वम् ।
शिव कीर्तितमागमतत्त्वम् ॥
जम्बीरस्तनि सर्वं तादृशजन्म न पश्यसि किं वा ।
अयि जन्म न पश्यसि किं वा ॥ ८४ ॥

ज्ञातं ज्ञातमशेषं संप्रति जातं वस्तु तथेति ।
शिव जातं वस्तु तथेति ॥
स्वातन्त्र्यं भुवि सर्वकलास्वपि साधितमेव भवत्या ।
अयि साधितमेव भवत्या ॥ ८५ ॥

छान्दोग्यागमषष्ठाध्यायकशास्त्रमिदं वदतीव ।
शिव शास्त्रमिदं वदतीव ॥
बिन्दोर्वैभवमाख्यातुं वटबीजमुदाहृतमेव ।
अयि बीजमुदाहृतमेव ॥ ८६ ॥

जन्माद्यस्य यतः स्यादित्यपि जातं सूत्रमपीह ।
शिव जातं सूत्रमपीह ॥
तन्मात्रं न तदन्तर्याम्यनु तत्त्वं चिन्तय सूत्रैः ।
अयि तत्त्वं चिन्तय सूत्रैः ॥ ८७ ॥

लास्यानन्द यथेत्यामन्त्रिणि लवणमिति स्फुटमुक्तम् ।
शिव लवणमिति स्फुटमुक्तम् ॥
तस्यां तस्यामुपनिषदीश्वरि तन्ननु सूचितमेव ।
अयि तन्ननु सूचितमेव ॥ ८८ ॥

सूचनया परतत्त्वं विन्दति सुन्दरि को जगतीह ।
शिव सुन्दरि को जगतीह ॥

काचन देशिकवाणी स्याद्यदि का पुनरस्य विचिन्ता ।
अयि का पुनरस्य विचिन्ता ॥ ८९ ॥

चिन्ता नास्ति च दुःखं नास्ति च चित्तवशास्मि तवाद्य ।
शिव चित्तवशास्मि तवाद्य ॥
हन्तानन्दमयोऽहं संप्रति हर्षमुपेह्यभयेन ।
अयि हर्षमुपेह्यभयेन ॥ ९० ॥

देहार्थासव एते संप्रति दत्ता देशिकपादे ।
शिव दत्ता देशिकपादे ॥
मोहार्थं त्यज शिष्ये सुन्दरि मुक्ता जीवसि नित्यम् ।
अयि मुक्ता जीवसि नित्यम् ॥ ९१ ॥

निःसंदेहं दृष्टे वस्तुनि नैव भवेन्मम मौढ्यम् ।
शिव नैव भवेन्मम मौढ्यम् ॥
कः संदेहस्तेऽस्ति प्रेयसि कर्म हरामि पुराणम् ।
अयि कर्म हरामि पुराणम् ॥ ९२ ॥

तद्वस्तूदयकालं दर्शय तन्मयतापसमूर्ते ।
शिव तन्मयतापसमूर्ते ॥
मद्वरसुन्दरि हेमन्ताधिकमासि नटाम्यहमेव ।
अयि मासि नटाम्यहमेव ॥ ९३ ॥

शेषं वेद्यमशेषं सूचय शिष्यायै हर मह्यम् ।
शिव शिष्यायै हर मह्यम् ॥
वेषं मामकमालोक्यात्मनि विद्याद्वेद्यमशेषम् ।
अयि विद्याद्वेद्यमशेषम् ॥ ९४ ॥

घोरशिवात्मकरूपत्वात्तव घोषितमात्ममहत्त्वम् ।
शिव घोषितमात्ममहत्त्वम् ॥
रामे[1] तनुरन्या ते सति गोप्यमिदं वचनं मे ।
अयि गोप्यमिदं वचनं मे ॥ ९५ ॥

मोक्षो मुक्तिरितीदं वल्लभ मोचनवाचकमेव ।
शिव मोचनवाचकमेव ॥
साक्षादान्तरमायावारणशब्दार्थं हृदि विद्धि ।
अयि शब्दार्थं हृदि विद्धि ॥ ९६ ॥

वास्तवमत्र विमुक्तौ कीर्तय वल्लभ ते प्रणमामि ।
शिव वल्लभ ते प्रणमामि ॥
हस्तचमत्कृतिमाचार्योत्तभहर्षवशादवधेहि ।
अयि हर्षवशादवधेहि ॥ ९७ ॥

दीक्षामद्य निधेहि दयाकर दीना यामि शरण्यम् ।
शिव दीना यामि शरण्यम् ॥
साक्षादस्तु तदेव निरञ्जनसाम्यमुपेह्यमृतास्व[2] ।
अयि साम्यमुपेह्यमृतास्व ॥ ९८ ॥

चक्षुषि यद्वत्पाशच्छेदनचातुर्यं तदिवास्ति ।
शिव चातुर्यं तदिवास्ति ॥
न क्षुद्राय न नासत्याय च नाशिष्याय च वाच्यम् ।
अयि नाशिष्याय च वाच्यम् ॥ ९९ ॥

मङ्गलमङ्गलमेतच्छङ्कर मङ्गलमेव भजामि ।
शिव मङ्गलमेव भजामि ॥

---

१. अत्र लघुद्वयस्य वा एकस्य गुरोर्वा लोपः ।
२. अमृता आस्व इति पदच्छेदः ।

सङ्गसुखादधिकानन्दो हृदि संभवतीदृशसिद्धौ ।
अयि संभवतीदृशसिद्धौ ॥ १०० ॥

त्वद्दयामृतसिन्धौ मज्जति तत्त्वमसीति मनो मे ।
शिव तत्त्वमसीति मनो मे ॥
त्वद्दया सखि मालाचन्दनतल्पसुखं मम जातम् ।
अयि तल्पसुखं मम जातम् ॥ १०१ ॥

चन्दनचर्चनमानन्दार्णव संप्रति ते कलयामि ।
शिव संप्रति ते कलयामि ॥
सुन्दरमस्ति सुखालिङ्गोदितसौख्यमनारतमस्तु ।
अयि सौख्यमनारतमस्तु ॥ १०२ ॥

पद्मभवार्चितपादाम्भोरुह पालय मामपि नित्यम् ।
शिव पालय मामपि नित्यम् ॥
सद्मनि वृद्धिरमुष्मिन् संप्रति संपदपारमुदेतु ।
अयि संपदपारमुदेतु ॥ १०३ ॥

बद्धाञ्जलये कस्मै प्राह स बालगुरुः परतत्त्वम् ।
शिव बालगुरुः परतत्त्वम् ॥
सिद्धार्थाय चिदानन्दाभिधशिष्यायाह तदेवम् ।
अयि शिष्यायाह तदेवम् ॥ १०४ ॥

श्रीपरमेश्वरकारुण्यामृतशीतलमानसवृत्त्या ।
शिव शीतलमानसवृत्त्या ॥
श्रीपरमेश्वरयोगीन्द्रो ननु शिक्षितमाह रहस्यम् ।
अयि शिक्षितमाह रहस्यम् ॥ १०५ ॥

॥ इति श्रीशारदातिलकं योगरहस्यं संपूर्णम् ॥

॥ सुलैमच्चरित्रम् ॥*

॥ श्रीकल्याणमल्लविरचितम् ॥

श्रीशमीशं च वागीशं लक्ष्मीं गौरीं सरस्वतीम् ।
गणेशं चापि वाल्मीकिं व्यासं चापि नमाम्यहम् ॥ १ ॥

आसीद्योध्याधिपतिर्बलवान् बलभित्समः ।
वैभवे विक्रमे तस्य नास्ति तुल्योऽपरः प्रभुः ॥ २ ॥

विद्वान् विशेषविच्छूरः प्रजापालनतत्परः ।
लोदीवंशा[1]वतंसश्च दयादाक्षिण्यतत्परः ॥ ३ ॥

अहमन्नृप इत्येवं विख्यातो धरणीतले ।
तस्य पुत्रः सुधर्मात्मा नीतिमान् प्रीतिमान् वशी ॥ ४ ॥

गाम्भीर्यौदार्यसौन्दर्यधैर्यशौर्यादिसद्गुणः ।
[2]मेधाविजितदेवेज्यः रूपनिर्जितमन्मथः ॥ ५ ॥

कामसिद्धान्तविद्वांश्च कामिनीनां मनोहरः ।
लाडखान इति ख्यातो लालित्यगुणमण्डितः ॥ ६ ॥

स कदाचित्समासीनः सभायां सह पण्डितैः ।
कथाभिरभिरामाभिरितिहासैः पुरातनैः ॥ ७ ॥

शास्त्रवादैः कलावादैर्धातुवादैरनेकशः ।
विद्वद्विशेषं विज्ञाय दानमानादिभिश्च तान् ॥ ८ ॥

सम्भावयन् समासीनो महापुरुषसत्कथाम् ।
श्रोतुकामस्तदा सूरिमण्डले स्वाश्रितं बुधम् ॥ ९ ॥

---

*मद्रास्-शासकीयप्राच्यहस्तलिखितकोशागारे D. 12175 अङ्कभृतो मातृकात उद्धृत्य प्रकाशितमिदम् । कविः कल्याणमल्लश्च प्रसिद्धः अनङ्गरङ्गस्य कर्ता । कल्याणमल्ल-लाडखानयोः कालः क्रि. १६-शताब्दी । १. 'श्या' इति मातृकायाम् । २. मेधावी इति मातृकायाम् ; देवेज्यो बृहस्पतिः, स मेधया विजितो येन सः ।

पप्रच्छ कविराजेन्द्रं काव्यनिर्माणकौशलम् ।
कल्याणमल्लनामानं कविसंस्तुत्यवाङ्मयम् ॥ १० ॥
त्वमसदास्थानकविस्सर्वशास्त्रार्थपारगः ।
पुरा ह्यनङ्गरङ्गाख्यं कलाशास्त्रं कलास्पदम् ॥ ११ ॥
गीर्वाणभाषया विद्वन्मानसानन्ददायकम् ।
कृतवानसि मत्प्रीत्यै बन्धुरं लोकसुन्दरम् ॥ १२ ॥
इदानीमपि सद्विद्वच्छ्लाघ्यं सर्वार्थगोचरम् ।
सुलैमच्चरितं[1] ब्रूहि चित्रं गीर्वाणभाषया ॥ १३ ॥
दावूदुतनयो विद्वान् सुलैमान् ज्ञानविग्रहः ।
द्वापरान्ते च कल्यादौ म्लेच्छवंशे महातपाः ॥ १४ ॥
समुत्पन्नः सप्तसुता[2]गर्भाब्धौ चन्द्रमा इव ।
तस्य जन्म च तद्वृत्तं तत्पितुश्च महोदयम् ॥ १५ ॥
कथय श्रोत्रघघ्नं[3] तत्परमानन्ददायकम् ।
इत्याज्ञप्तो बहुविधैर्भूषणाम्बरवाहनैः ॥ १६ ॥
सम्भावितस्समासीनो वक्तुं समुपचक्रमे ।
पुरा दावूदुरखिलामिलामेकोऽनुपालयन्[4] ॥ १७ ॥

---

१. 'सुलैमान्' इति इस्लामीयसंप्रदाये नाम; हीब्रूसंप्रदाये 'ओल्ड् टेस्टमेण्ट्'-ग्रन्थे 'सालमन्' इति। तत्पितुः 'दावूद्' - इति इस्लामीये, 'डेविड्' इति हीब्रूसंप्रदाये नाम। डेविड्-सालमन्-चरित्रं 'ओल्ड् टेस्टमेण्ट्' - ग्रन्थे प्रसिद्धम्; किञ्चिद्भेदैः नामव्यत्यासैश्चानयोरिस्लेल्-राजयोः कथा इस्लांचरित्रेऽपि स्मृता।

२. दावूदस्य पत्न्या नाम न साक्षाद् विदितम्; तस्याः सप्त सुता आसन्; अतः 'सप्तसुता' इति तन्नाम कल्पितं स्यात्कविना।

३. श्रोतॄणामघघ्नमिति च्छेदः।

४. तस्य राज्यकालः क्रिस्तोः पूर्वं १००२; ३३ वर्षाणि स शशास।

पुरन्दर इव श्रीमानवसद्धरणीतले ।
स सप्तम[1] इति ख्यातः पूतः स्वेनैव कर्मणा ॥ १८ ॥

तस्य देवप्रभावस्य धर्मज्ञस्य महीपतेः ।
पुत्रा बभूवुर्बलिनो द्वादशादित्यवर्चसः ॥ १९ ॥

तस्यैवं वर्तमानस्य मुनिः कश्चित्क्रुधान्वितः ।
शशापास्य मतिः पापवर्त्तिनी स्यादिति स्फुटम् ॥ २० ॥

तत्काले दैवयोगेन महाबलपरिग्रहौ ।
युवानौ भयदाकारौ वीरौ शूरौ धरातले ।
कम्पयन्तौ भुवं सर्वां महत्या सेनया युतौ ॥ २१ ॥

आस्तां द्वापरकलिविख्यातौ द्वौ राक्षसौ बलाध्यक्षौ ।
धीरौ रावणतुल्यौ मायामार्गप्रचारचातुर्यौ[2] ॥ २२ ॥

तौ सर्वमानवविनाशनहेतुभूत-
जन्मव्रतौ सुरमुनीश्वरबद्धवैरौ ।
सद्भूसुरौघरचिताध्वरकर्मविघ्न-
सम्पादकौ विगतधर्मविवेकपाकौ ॥ २३ ॥

तौ ससैन्यौ समाहूय पार्वतीयो महीपतिः[3] ।
संभाव्य बहुधा ताभ्यां युतः क्रोधसमन्वितः ॥ २४ ॥

दावूदुविषयं सर्वं सैन्यैः परिवृतः स्वकैः ।
अर्दयामास तत्रत्यजनान् तर्जनताडनैः ॥ २५ ॥

---

१. सप्तमः सुत इति प्रायः ; क्वचिदष्टम इति ।
२. ईदृशेषु स्थलेषु वर्णनायां कविना भारतीया ऐतिहासिका अंशा योजिताः ।
३. अम्मन्-महीपतिः, जोअव् इति श्रुतः ।

दावूदुरपि तद्वृतं श्रुत्वा चारमुखाद्विभुः ।
किं कर्तव्यमिति श्रीमानात्मन्येव व्यचिन्तयत् ॥ २६ ॥

स विनिश्चित्य धर्मज्ञः भाविकर्मफलानुगः ।
[1]सेनापतिं महावीर्यं जयावहमथाब्रवीत् ॥ २७ ॥

मम सेनाग्रगाः सन्ति द्वादशैते महारथाः ।
तैस्ससैन्यैः परिवृतो गच्छ युद्धाय सत्वरः ॥ २८ ॥

मम शत्रुर्महावीर्यः पार्वतीयो महीपतिः ।
दनुजाभ्यां ससैन्याभ्यामन्वितो रणकर्कशः ॥ २९ ॥

अस्मद्देशमनुप्राप्य विनाशयति नित्यशः ।
तस्मात्त्वं तद्वधायाद्य निर्याहि बलिभिस्सह ॥ ३० ॥

गत्वा तं क्रूरकर्माणं सभृत्यज्ञातिबान्धवम् ।
हत्वा रणे रणश्लाघ्य पुनरागन्तुमर्हसि ॥ ३१ ॥

इत्युक्त्वा सैन्यसहितं प्रेषयामास तं नृपः ।
न जगाम स्वयं राजा दैवोपहतचेतनः ॥ ३२ ॥

भाविकर्मबलाद्वीरो दुर्बुद्धिं समुपेयिवान् ।
सेनापतिस्ततो गत्वा सैन्येन महता वृतः ॥ ३३ ॥

तेन राज्ञा समारेभे सङ्ग्राममतिदारुणम् ।
तद्युद्धमभवद्घोरं नरराक्षससंकुलम् ॥ ३४ ॥

बहुकालं न तज्जन्यं संशान्तमभवत्तदा ।
तस्मिन् काले महाबाहुर्दावूदुर्विधिचोदितः ॥ ३५ ॥

---

१. 'उरीय' (Uriah) इति ख्यातं, हिट्टैट् जातीयम् ।

कदाचिदप्यनारूढं सौधाग्रं शिथिलं तदा ।
अध्यारुरोह सायाह्ने निर्जनं जनवर्जितः ॥ ३६ ॥

तत्रारुह्य विभिन्नैक[1]कुड्यरन्ध्रेण भूपतिः ।
अपश्यद्दैवयोगेन सुरूपां काञ्चिदङ्गनाम्[2] ॥ ३७ ॥

विहरन्तीं स्वसौधाग्रे मायामिव मयोदिताम् ।
विचित्राभरणोपेतां नीलबन्धुरमूर्धजाम् ॥ ३८ ॥

कुन्तलाञ्चितफालान्तां बिम्बोष्ठीं कन्दुकस्तनीम् ।
कुन्दकुड्मलसङ्काशरदश्रेणीविराजिताम् ॥ ३९ ॥

पद्मपत्रविशालाक्षीं पद्मिनीं पद्मसौरभाम् ।
कौसुम्भाम्बरविभ्राजत्कमनीयतनूलताम् ॥ ४० ॥

नेत्रानन्दकरीं मारदाररूपां मनोहराम् ।
मात्रा पार्श्वस्थया हावभावहेलाभिभाषिणीम् ॥ ४१ ॥

दूरस्थितं स्वभर्तारं स्मरन्तीं खिन्नमानसाम् ।
विस्मृत्य तत्पुनः क्रीडालोलां बालां कलामयीम् ॥ ४२ ॥

मोहयन्तीं जगत्सर्वं मोहिनीं रूपसम्पदा ।
तां दृष्ट्वा चारुसर्वाङ्गीं दावूदुर्मदनार्दितः ॥ ४३ ॥

पुनः पुनरपश्यत्तां मोहव्याकुलितेन्द्रियः ।
कैषा योषा लसद्भूषा दोषाकरनिभानना ॥ ४४ ॥

ईदृग्रूपा मया नारी दृष्टपूर्वा कदापि न ।
नवोढयानया सार्धं नक्तं दिवमतन्द्रितः ॥ ४५ ॥

---

१. '°कः' इति मातृकायाम् ।

२. एषा दावूदसेनापतेरुरियनामकस्य भार्या 'बात्षेबा'-नाम्नी ।

यो रमेत[1] हि धीरा[2]त्मा तस्य जन्मैव सार्थकम् ।
कुचकुम्भान्तरे लग्नं मनोऽस्या मम साम्प्रतम् ॥ ४६ ॥

नायाति शतधाकृष्टमपि किं करवाण्यहम् ।
आहूयमाना मोहेन मयेयं मधुराधरा ॥ ४७ ॥

अङ्गीकरोति वा नो वा न जानेऽस्या मनोगतम् ।
यदि नायाति चाहूता भवेयं बहुधा लघुः ॥ ४८ ॥

किं करोमि क्व गच्छामि कथं जीवामि तां विना ।
शरणं किंचिदप्यस्ति न मे मारो हरत्यसून् ॥ ४९ ॥

इति सञ्चिन्त्य तद्रूपविलोकनविमोहितः ।
क्षणं जगाम विकृतिं पुनः प्रकृतिमाप सः ॥ ५० ॥

कोऽयं मम समुत्पन्नो विकारो दुरतिक्रमः ।
हृदये सदये न्यस्य भार्याहरणहेतुकः ॥ ५१ ॥

क्वाहं प्रजानामधिपः क्व चेयं च पराङ्गना ।
अस्यां मम मनोवृत्तिरयुक्ता प्रतिभाति मे ॥ ५२ ॥

पराङ्गनाभिलाषो हि सर्वसम्पद्विनाशकः ।
नरकप्रापकश्चैव सर्वसज्जननिन्दितः ॥ ५३ ॥

परदाराभिमर्शाद्धि परं पङ्कं न विद्यते ।
मलमूत्राध्वगे योषिज्जघनेऽपघने तथा ॥ ५४ ॥

श्लेष्मागारे मुखे मांसस्तबके च कुचद्वये ॥
निन्द्येऽनिन्द्य[3] इवात्यर्थं किमर्थं मम मानसम् ॥ ५५ ॥

---

१. 'रमेत्स' इति मातृकायाम् । २. धीन्या इति मातृकायाम् ।
३. अनिन्द्ये सद्विषये यथा भवितुमर्हति, तथा निन्द्येऽस्मिन् किमर्थमत्यर्थं मोहितम् ।

प्रविष्टं मोहितं चाद्य न जानाम्यत्र कारणम् ।
परकान्ताभिलाषेण बहवः कीचकादयः ॥ ५६ ॥

ऐश्वर्यमदमत्तास्तु हता इति च शुश्रुमः ।
तस्मान्ममाभिलाषोऽयमयुक्तः परयोषिति ॥ ५७ ॥

इति निश्चित्य मनसा चैत्यादवततार ह ।
अवरुह्यालयं प्राप्य न लेभे सुखमात्मनि ॥ ५८ ॥

रात्रौ शयानः शयने पुनस्तामनुचिन्तयन् ।
पुरः स्थितामिव रहः प्रेक्षमाणो मनोगताम् ॥ ५९ ॥

मारनाराचनिर्भिन्नमानसः सञ्चचाल ह ।
हा ! कष्टमिति निश्वस्य विवर्णवदनः कृशः ॥ ६० ॥

रोमाञ्चिताङ्गो विस्रस्तबहुस्रो विस्वरो जडः ।
कामज्वरविकारार्तः शुष्ककण्ठोष्ठतालुकः ॥ ६१ ॥

नाध्यगच्छत्परं पारं विरहाब्धेस्सुदुस्तरम् ।
ब्रह्मेश्वरादयो देवा मुनयश्च पुरातनाः ॥ ६२ ॥

विमोहिताः पुरा स्त्रीभिः कियानेष महीपतिः ।
द्विजराजो गुरोर्भार्यां मुनिभार्यां शतक्रतुः ॥ ६३ ॥

पितामहस्सुतां मोहादभजन् किं नु मानवः ।
व्याघ्रस्य पुरतः स्थातुं शक्यमग्नेश्शिखासु वा ॥ ६४ ॥

न तु स्त्रीणां पुरः स्थातुं शक्यमीशस्य वा रहः ।
स राजा तां स्मरन्निद्रां न लेभे मदनातुरः ॥ ६५ ॥

पतिव्रतां शुभाचारां परपत्नीं विलोक्य सः ।
मोहमाहारयत्तीव्रं कामबाणबलार्दितः ॥ ६६ ॥

तस्याननाधरविलोचनदन्तकण्ठ-
वक्षोजजङ्घजघनोरुपदद्वयेषु ।
मग्नां महीपतिरसौ न शशाक दृष्टि-
माकर्षितुं प्रचलितुं गदितुं च किञ्चित् ॥ ६७ ॥

इति श्रीमदयोध्यापुराधिनाथसकलकलासनाथविद्वज्जनजेगीयमान-
गानावधानदानजितकानीन[1]लाडखानप्रमोदाय कुकविहृद्भल्ल[2]-
कल्याणमल्लकविराजविरचिते सुलैमच्चरित्रे दावूदु-
मोहाविर्भावो नाम प्रथमः पटलः ॥

॥ अथ द्वितीयः पटलः ॥

ततः प्रभाते विमले बोधितः स्तुतिपाठकैः ।
उत्थाय शयनाद्राजा कृत्वा पौर्वाह्णिकीः[3] क्रियाः ॥ १ ॥

आस्थानमण्टपं गत्वा मन्त्रिभिः सह मन्त्रवित् ।
निर्वर्त्य पौरकार्याणि स्नात्वा भुक्त्वा यथाविधि ॥ २ ॥

आरुरोह पुनः सौधं स्मृत्वा तां पद्मलोचनाम् ।
आरुह्य च यथापूर्वं तच्छिद्रेण नृपोत्तमः ॥ ३ ॥

तां द्रष्टुकामस्तत्रैव न्यवसन्मौनमाश्रितः ।
ततः समागता गेहाद्विद्युल्लेखेव वारिदात् ॥ ४ ॥

पादयोर्मञ्जुमञ्जीरसिंजारावपुरस्सरा ।
हारनूपुरकेयूरमुक्तामणिविभूषिता ॥ ५ ॥

---

१. कानीनः कर्णः । २. भल्लः शरः ।
३. पूर्वाह्णिकीः इति मातृकायाम् ।

देदीप्यमानहैरण्यवज्रकुण्डलमण्डिता ।
घण्टिकाञ्चितकल्याणमेखलादामराजिता ॥ ६ ॥

मणिप्रकरसन्नद्धस्वर्णकङ्कणशोभिता ।
अङ्गुल्याभरणोपेता करशाखाभिभासिता ॥ ७ ॥

रक्तांशुकाञ्चलाबद्धकुचचक्रांगसङ्गता ।[1]
मत्तमातङ्गगमना राजहंसीव राजति ॥ ८ ॥

बहिरागत्य सा मन्दं सलिलान्तिकमभ्यगात् ।
कण्ठदघ्नजलं रम्यं निष्पङ्कं पङ्कजान्वितम् ॥ ९ ॥

सरः समीक्षमाणा सा तत्तीरे समुपाविशत् ।
तत्र भूषणजालानि क्रमेणाकृष्य भामिनी ॥ १० ॥

विन्यस्य कञ्चुकं चित्रं विमुच्यांशुकसंयुतम् ।
आच्छाद्य च कुचौ पीनौ कराभ्यां संभ्रमान्विता ॥ ११ ॥

किञ्चिल्लज्जापरा वेगादागत्याप्सु ममज्ज सा ।
तस्मिन् सरसि सानन्दं रममाणा मनोहरा ॥ १२ ॥

कमलानि कराब्जाभ्यां कर्षन्ती[2] कुमुदानि च ।
शैवालांकुरजालानि कुड्मलांश्च विनिघ्नती ॥ १३ ॥

मद्वक्त्रकेशकुचयान[3]दृगेकलक्ष्(मी)[4]माहृत्य[5] नित्यममलेऽम्भसि लीयमानाः ।
चोरा भवन्त इति [6]पङ्कज-शैवलारिहंसालिमीननिवहानहरत्कराभ्याम् ॥ १४ ॥

---

१. अत्र मातृकायामेकं पुटं शून्यं, किन्तु ग्रन्थविच्छेदो नास्ति ।

२. कर्षती इति मातृकायाम् । ३. यानं गतिः ४. दृगैकलक्ष्म इति मातृकायाम् । ५. °वृत्य इति मातृकायाम् । ६. पङ्कजेन वक्त्रस्य, शैवलेन केशस्य इति यथासंख्यालङ्कारः ; अरि चक्रम् ; पर्यायेण तदाह्वः पक्षी, येन कुचोपमा प्रसिद्धा ; हंसालिः हंससमूह इति यानोपमा । मीन इति दृगुपमा ।

ततः सा सुन्दरी बाला कटिनद्धाम्बरं शनैः ।
विमुच्य रोधसि क्षिप्त्वा जलक्रीडामथाकरोत् ॥ १५ ॥

तदा भूमिपालस्तदास्याक्षिकक्षं
शिरोजाधरोद्यत्कुचं जानुजङ्घम् ।
नितम्बोरुयुग्मं निरीक्ष्य स्मरार्तो
मुहूर्तं विचेष्टो विसंज्ञो बभूव ॥ १६ ॥

मुनीश्वरास्सुरेश्वराः पुरा वराङ्गनाः पुरो
निरीक्ष्य मूढचेतसस्तपो विहाय मोहिताः ।
अयं तदीयमङ्गमन्ततो निरीक्ष्य विक्षत-
श्शरैः स्मरेण किं भवेन्न मोहितो गतक्षमः[1] ॥ १७ ॥

नाभिगह्वरमग्नोऽपि कुचशैलाधिरोहणम् ।
कर्तुमाप्लुत्य चाप्लुत्य यतते (मे)[2] मनोमृगः ॥ १८ ॥

इति सञ्चिन्तयाने[3] तु राज्ञि चात्मन्यनेकधा ।
विहाय सलिलक्रीडामाजगाम जलात्तटम् ॥ १९ ॥

तां तथा निर्गतां दृष्ट्वा विवस्त्रां मुक्तकञ्चुकाम् ।
तद्गतेनैव मनसा राजा तूष्णीं स्थितोऽभवत् ॥ २० ॥

परिधायाम्बरं धौतं भूषणान्यवसज्य सा ।
जगामान्तर्गृहं चन्द्रलेखेवाम्बुदमध्यमम् ॥ २१ ॥

अस्यां गतायां भूमीशोऽप्यवतीर्यालयाग्रतः ।
आविवेशात्मनो गेहं मोहव्याकुलितेन्द्रियः ॥ २२ ॥

---

१. गता क्षमा यस्य, अक्षमः कामबाधाया इत्यर्थः ।

२. अक्षरमिदं मातृकायां लुप्तम् ।

३. °न्त्यमाने इति मातृकायाम् ।

तत्र शय्यातलेऽगत्या[1] पपात मदनार्दितः।
सर्वावस्थासमापन्नो विनैकां चरमां[2] तदा ॥ २३ ॥

तद्रूपलग्नचक्षुस्तां स्मरन् ध्यायन् हसन् लपन्।
विवेश विविधान् भावान् मनोवाक्कायगोचरान् ॥ २४ ॥

तदवस्थं नृपं दृष्ट्वा ज्ञात्वा तस्य मनोगतम्।
प्राप तद्भर्तृसामीप्यं सुखदा सुखदा[3] तदा ॥ २५ ॥

साऽद्वितीया द्वितीया[4] च राज्ञस्तस्य महात्मनः।
मनोरथं पूरयितुं यतमानेदमब्रवीत् ॥ २६ ॥

किमिदं राजराजेन्द्र! वैवर्ण्यं तव विग्रहे।
अपूर्वं दृश्यते पूर्वमदृष्टं हितया मया ॥ २७ ॥

कार्श्यमङ्गेषु मौढ्यं च प्रलापः परिदेवनम्।
मूर्छा मुमूर्षा हासश्च विरहं सूचयन्ति ते ॥ २८ ॥

यां दृष्ट्वा मोहितोऽसि त्वं का सा सर्वाङ्गसुन्दरी।
वद तामानयिष्यामि[5] तव चित्तप्रमाथिनीम् ॥ २९ ॥

इत्युक्तः स तया हर्षादुत्थाय शयनोत्तमात्।
सुखदां सुखदां मत्वा धृत्वा तत्करपङ्कजम् ॥ ३० ॥

आलिङ्ग्याङ्के निवेश्यैनां प्रत्युवाच महीपतिः।
भर्तृभक्तियुता भार्या त्वमेका भुवि निश्चिता ॥ ३१ ॥

---

१. गत्य इति मातृकायाम्।

२. चरमां दशमदनावस्थासु अन्तिमां मरणरूपां विना सर्वामन्यामित्यर्थः।

३. अत्रैकः सुखदाशब्दः दावूदप्रथमभार्याया नामत्वेन ग्राह्यः; तच्च कविकल्पितं नाम।

४. अद्वितीया निरुपमा; द्वितीया भार्या।

५. आर्षः प्रयोगः।

मदाप्तवर्गे भवती विशेषिता
न चास्ति तुल्या तव काचिदङ्गना ।
न चेत्कथं शक्ष्यसि मन्मनोहरां
परां मया योजयितुं तलोदरीम् ॥ ३२ ॥

कामिनीजनमनोगतवृत्तो वेद्म्यहं परपयोरुहनेत्रीम् ।
कामयेद्यदि[1] पतिर्न पतिर्नश्शत्रुरित्यनुवदन्ति मृगाक्ष्यः ॥ ३३ ॥

तस्माद्भार्यां प्रति ब्रूयान्नैव भावं मनोगतम् ।
निवेद्य स भवेच्छत्रुस्तासां नास्त्यत्र संशयः ॥ ३४ ॥

इत्येवं बहुधादिष्टं मुनिभिस्तत्त्वदर्शिभिः ।
न तथा ह्यसि सुश्रोणि तस्माद्वक्ष्यामि तां शृणु ॥ ३५ ॥

अस्मद्गृहाद्दक्षिणतः समीपेऽस्ति महद्गृहम् ।
तस्मिन्नस्ति वरारोहा काचित्त्रैलोक्यसुन्दरी ॥ ३६ ॥

तादृग्रूपा मया नारी(न्या) दृष्टपूर्वा महीतले ।
भ्रमतां जगतीं सर्वां कदाचिदपि मानिनी ॥ ३७ ॥

यां विलोक्य विधिरन्वहं स्त्रियः
सुन्दरी(:) सृजति मन्मथोऽनिशम् ।
यां निधाय पुरतो जगज्जय-
न्नेति तां कथि(गदि?)तुमत्र कः क्षमः ॥ ३८ ॥

तस्याः पयोधरमहीधरयुग्ममध्य-
लग्नं दृढं मम मनो न हि मामुपैति ।
तन्नाभिपङ्कजगुहान्तरसन्निमग्न-
मद्दृष्टिरप्यहह नैव च मामुपैति ॥ ३९ ॥

---

१. कामयेऽद्य पतिः इति मातृकायाम् । तथा कुर्वन् पतिः न पतिर्भवति, किन्तु शत्रुः ।

मम दृष्टिर्मनश्चैव तयैव सह निर्गते ।
ताभ्यामिन्द्रियजालानि सहैवाद्य गतानि मे ॥ ४० ॥

शरीरमेकमे(वा)त्र स्थितमन्यन्न किञ्चन ।
तां समानीय यदि मद्वशगां कुरुषे प्रिये ॥ ४१ ॥

न त्वदाज्ञां जहामि त्वमीश्वरी मम योषिताम् ।
सर्वासामित्यतिप्रेम्णा समादिष्टा सुखप्रदा ॥ ४२ ॥

आनयामीति संश्रुत्य जगाम स्वनिवेशनात् ।
तदालयं[1] प्रविश्याथ सुखदा पूजिता तया ॥ ४३ ॥

कुशलं परिपृष्टा च स्वासने चोपवेशिता ।
समीपे समुपासीना लोकवृत्तानि पृच्छति[2] ॥ ४४ ॥

भर्ता तव विशालाक्षि रणशीर्षमितो गतः ।
कालो महानतीतस्ते भर्तृसंयोगसौख्यदः ॥ ४५ ॥

निरर्थकमतिक्रान्तं यौवनं ते सुमध्यमे ।
यदतीतं पुनर्नैति सर्वोपायैरपि क्षितौ ॥ ४६ ॥

तरुणीनां वयःकाले वियोगो दुःखदायकः ।
संयोगसदृशं सौख्यं किमस्त्यन्यन्महीतले ॥ ४७ ॥

ब्रह्मानन्दसमं प्राहुर्मुनयः शंसितव्रताः ।
असारे खलु संसारे सारः संयोग ईरितः ॥ ४८ ॥

संयोगकाङ्क्षया लक्ष्मीर्हरेरुरसि संस्थिता ।
तथोमा च महादेवमालिङ्ग्याङ्गे समास्थिता ॥ ४९ ॥

---

१. तस्या वात्सेवाया आलयम् ; तस्यालयमिति मातृकायाम् ।

२. °ती इति मातृकायाम् ।

भारती भर्तृवदनं कदाचिन्न विमुञ्चति ।
तस्माच्छरीरिणां भद्रे संयोगस्सौख्यहेतुकः ॥ ५० ॥

तत्र कि(क)ञ्चिद्विशेषं ते वक्ष्यामि शृणु सुन्दरि ।
भर्तृसंयोगतोऽन्यस्य संयोगोऽतिसुखप्रदः ॥ ५१ ॥

प्रमदायाः प्रतीतायाः किं सौख्यं रतिवर्जितम् ।
तिर्यञ्चोऽपि सदा लोके रमन्ते स्वस्वजातिषु ॥ ५२ ॥

[1]यथाशनं च निद्रा च तथा मैथुनमुच्यते ।
देहिनां तद्विहीनानामन्यत्सौख्यं निरर्थकम् ॥ ५३ ॥

सुराचार्यद्वितीयायास्तारायाश्चरितं पुरा ।
न श्रु(ता) वा त्वया भद्रे द्विजराजोपभोगजम् ॥ ५४ ॥

अहल्या(या)श्च राधाया इन्द्रोपेन्द्रसमागमम् ।
श्रुत्वापि त्वं वृथा कालयापनं कुरुषेऽबले ॥ ५५ ॥

पातिव्रत्यं क्व चाङ्गस्य सौख्यसम्पादनं क्व च ।
तारतम्यं विचार्यैव यभस्व यदि रोचते ॥ ५६ ॥

त्वां परित्यक्तसंसर्गां विज्ञायाहं कृपान्विता ।
पुंसा मनोहरेण त्वां संयोजयितुमागता ॥ ५७ ॥

तव भाग्यविशेषेण मम भर्ता महाप्रभुः ।
त्वय्यायत्तमना[2] भूत्वा त्वामानयितु[3]मञ्जसा ॥ ५८ ॥

मामेव प्रेषयामास समागच्छ मया सह ।
इत्येवमुक्ता सा तन्वी राजपत्न्या रहस्तदा ॥ ५९ ॥

---

१. यदा इति मातृकायाम् । २. मनो इति मातृकायाम् । ३. आर्षः प्रयोगः ।

विहस्य किञ्चित्तामाह कोपारुणितलोचना ।
सम्यगुक्ता त्वया भद्रे बुद्धिर्मम महीयसी ॥ ६० ॥

एवमेव हि वक्तव्या भर्तृमत्यस्त्रियस्त्वया[1] ।
पञ्चभूतात्मको देहस्त्वङ्मांसरुधिरास्थिमान् ॥ ६१ ॥

जलबुद्बुदवन्नाश्यः क्षणिकः कालकर्मयुक् ।
यावज्जीवसमायुक्तस्तावत्पूज्यो भवेज्जनैः ॥ ६२ ॥

क्षणादस्पृश्यतां याति जीवात्मनि विनिर्गते ।
जरा व्याघ्रीव गर्जन्ती पुरतोऽस्य प्रवर्तते ॥ ६३ ॥

रोगाश्च शत्रव इव प्रहरन्ति घटं सदा ।
आयुः स्रवति संभिन्नघटाज्जलमिवान्वहम् ॥ ६४ ॥

तस्मिन् शतामयो(ये) गात्रे कोऽभिमानो विनिन्दिते ।
किं कायेन सुपुष्टेन बलिना चिरजीविना ॥ ६५ ॥

यद्यच्छुभं विनाश्येऽङ्गे[2] भूषणाम्बररूपकम् ।
तत्सर्वं विफलं ज्ञेयं शवालङ्कृतिवत्कृतम् ॥ ६६ ॥

किं तस्य सङ्गजं सौख्यं काष्ठभूतस्य जीर्यतः ।
देहस्य मोहबीजस्य बहुदुःखानुगस्य च ॥ ६७ ॥

नायं सङ्गसुखार्थाय कायो धार्यः कृतात्मभिः ।
परलोकसुखार्थाय धार्यो भवति तच्छृणु ॥ ६८ ॥

स्नानदानजपादीनि कायकर्माणि सत्क्रियाः ।
कायमूलाः कुलाचार(रा)ः धर्मार्थाश्चापि तद्भवाः ॥ ६९ ॥

---

१. एतत्सोपहाससमुक्तम् ।

२. विनाशिनि अङ्गे इत्यर्थः ; विनश्ये इति मातृकायाम् ।

अस्मिन् कर्माकरे देहे यावज्जीवोऽवतिष्ठति ।
तावत्सर्वेन्द्रियग्रामं निगृह्य नियमान्वितः ॥ ७० ॥

ध्यानधारणमुख्याङ्गं योगमाश्रित्य निश्चलः ।
प्रकृतिं तां पराजित्य ब्रह्मलीनमनो(ना) भवेत् ॥ ७१ ॥

सङ्कीर्तयेद्धरिं शम्भुं पूजयेद्भक्तिसंयुतः ।
अहर्दिवं परे बुद्धिं विन्यस्य स सुखी भवेत् ॥ ७२ ॥

एतत्सुखं शरीरस्य न ह्यन्यकृतसङ्गमम् ।
सुखं सुमुख्यलं गच्छ नाहं तादृग्गुणा सती[1] ॥ ७३ ॥

त्वद्वचः पथ्यमित्येवं गृहीत्वा कर्तुमञ्जसा ।
इत्येवं सा पराभूता तया राज्ञी महोदया ॥ ७४ ॥

तथैव भव विस्रब्धेत्युक्त्वागात्स्वं निवेशनम् ।
शृणोति मे वचो नेयं कथं कार्यमितः परम् ॥ ७५ ॥

निवेदयामि राज्ञे तन्निश्चयं त्वति(त्विति ?) वेगिता ।
राज्ञः समीपमागत्य व्याजहार यथाक्रमम् ॥ ७६ ॥

त्वया सम्प्रेषिता राजन् गतवत्यस्मि तद्गृहम् ।
का सेति पृष्टा[2] वक्ष्यामि शृणु राजन् यथातथम् ॥ ७७ ॥

सा शुभाङ्गी शुभाचारा सर्वलक्षणलक्षिता ।
ऊर्जस्वलस्य[3] भार्या सा तव सेनापतेः प्रिया ॥ ७८ ॥

पतिव्रता महाभागा स्नानदानपरायणा ।
पुण्यार्जनपरा सत्यव्रतसञ्चरणे रता ॥ ७९ ॥

---

१. सती अहं न तादृग्गुणा इत्यन्वयः ।

२. त्वया पृष्टा सती वक्ष्यमीति योजना ।

३. ऊर्जस्वलः—'ऊरिया' इति नाम्नः संस्कृतीकृतं रूपम् ।

देहाभिमानरहिता कामक्रोधविवर्जिता ।
शिवपूजारता नित्यं ब्रह्मज्ञा ब्रह्मवादिनी ॥ ८० ॥

अनपत्या दृढाचारा बाला सम्प्राप्तयौवना ।
त्वदुक्तं श्राविता कर्णौ पिधाय हरिमादरात् ॥ ८१ ॥

स्मृत्वा यदाह तद्वक्तुं नास्ति शक्तिर्ममानघ ।
अहमौपयिकी भार्या मम भर्तुर्महात्मनः[1] ॥ ८२ ॥

पदापि न स्पृशाम्यन्यं गच्छ मा वद किल्बिषम् ।
इहलोकविरुद्धं च परलोकप्रणाशनम् ॥ ८३ ॥

नैवारभेन्नरः[2] कर्म सर्वसज्जननिन्दितम् ।
उक्तं सर्वज्ञया पूर्वं सीतया रावणं प्रति ॥ ८४ ॥

आत्मानमुपमां कृत्वा स्वेषु दारेषु रम्यताम्[3] ।
अर्थोऽयमेव ते भर्तुर्निवेद्यस्सीतयोदितः ॥ ८५ ॥

नैवाहं परकीयास्मि स्वीयास्मि वरवर्णिनी ।
गच्छैवं हि त्वया वाच्यं न कदाचिन्ममाग्रतः ॥ ८६ ॥

एवमुक्तवती साध्वी सा मां सप्तसुता[4] प्रभो ।
तस्मात्त्याज्या त्वया वीर परभार्या पतिव्रता ॥ ८७ ॥

नायाति[5] शतधाप्युक्ता निःस्पृहा सा तवान्तिकम् ।
इत्युक्तः स तया राजा विकलश्चलितेन्द्रियः ॥ ८८ ॥

---

१. रामायणे रावणं प्रति सीतोक्तं वाक्यमिदमनुसरति ।
२. 'नारमेत नरः' इति समीचीनः पाठः स्यात् ।
३. रंस्यताम् इति मातृकायाम् ।
४. वात्सेवा ; 'सेवा'-शब्दः सप्तशब्दसोदरः ।
५. नायति इति मातृकायाम् ।

दीर्घमुष्णं विनिःश्वस्य शापोपहतचेतनः ।
त्यक्त्वा विवेकं ज्ञानं च सुखदा[1]मिदमब्रवीत् ॥ ८९ ॥

यदि नायाति सा भीरुर्ममान्तिकमनिन्दिते ।
तदैव मरणं मे स्यात्सत्यमेतद्ब्रवीमि ते ॥ ९० ॥

शुकाः पिकाः द्विरेफाश्च चन्द्रमा दक्षिणानलः ।
आत्मभूश्च समं सर्वे मां हन्तुं समुपस्थिताः ॥ ९१ ।

यद्यस्ति मयि सौहार्दं यद्यस्ति मयि गौरवम् ।
यद्यस्ति पतिशुश्रूषा यद्यस्ति च मयि प्रियम् ॥ ९२ ॥

तव पश्यामि ते प्रज्ञां[2] केनोपायेन वा प्रिये ।
पुनर्गत्वा प्रलोभ्यैनां समानय सुसत्कृताम् ॥ ९३ ॥

मन्त्रैस्तन्त्रैर्मूलिकैश्च[3] धनाम्बरविभूषणैः ।
प्रलोभ्य विविधोपायैरानयैनां शुचिस्मिताम् ॥ ९४ ॥

यद्यानयसि तामद्य नास्ति त्वत्तोऽधिका प्रिया ।
मम त्वदुक्तं शिरसा वहामि न तदन्यथा[4] ॥ ९५ ॥

गच्छ शीघ्रमितो देवि कुरु कल्याणमुत्तमम् ।
इति प्रतिसमादिष्टा सुखदा दुःखिता सती ॥ ९६ ॥

गच्छन्ती मार्गमासाद्य स्वात्मन्येवं व्यचिन्तयत् ।
कथं करोमि सा तन्वी न शृणोति वचो मम ॥ ९७ ॥

---

१. स्वभार्याम् ।
२. 'प्रज्ञा' इति मातृकायाम् ।
३. मूलनिर्वृत्तैर्द्रव्यैः ।
४. करिष्यामि इति वाक्यशेषः ।

तदयुक्तं त्यजेत्युक्तो न जहाति महीपतिः ।
कथं घटयितुं शक्यमशक्यं प्रतिभाति मे ॥ ९८ ॥

इति चिन्ताकुला चित्ते मन्दं मन्दं तदा ययौ ।
सुखदा तद्गृहं कार्यघटनायासखेदिता ॥ ९९ ॥

एतदेव विचित्रं तत्सुखदाया विचेष्टितम् ।
पराङ्गनां समानीय स्वभर्त्रा सह योजनम् ॥ १०० ॥

अन्याङ्गनारतायत्तं भर्तारं कुलयोषितः ।
त्यजन्ति दूरतो नित्यं विवदन्ति च निर्भयम् ।
एवं स्त्रीणां समाचारः सर्वत्र परिदृश्यते ॥ १०१ ॥

व्यतिरेकोऽभवत्सोऽयं सुखदायां महीतले ।
स्वयमेवाङ्गनामन्यां संयोजयितुमुद्यता ॥ १०२ ॥

किमत्र कारणं ब्रूहीत्युक्ते वक्ष्याम्यहं पुरा ।
दावूदोर्धरणीशस्य द्वे भार्ये संबभूवतुः ॥ १०३ ॥

रूपेणाप्रतिमे लोके सर्वावगुणवर्जिते ॥
न तयोस्तनयोत्पत्तिर्बभूव कुलवर्धनी ॥ १०४ ॥

भोगिन्यः पञ्च चैवास्य सौन्दर्यरसकारिताः ।
तासु पञ्चसु सर्वाङ्गसुन्दरी प्रथमाभवत् ॥ १०५ ॥

तस्याः पुत्रो विशालाक्षो बभूव शुभलक्षणः ।
बलवान्निहतामित्रो मित्रवान् पितृपूजकः ॥ १०६ ॥

शूरः सर्वास्त्रकुशलः कुमार इव संयुगे ।
तस्य पुत्रस्य सेनाधिपत्यं दापयितुं रहः ॥ १०७ ॥

भर्तारं प्रार्थयामास भोगिनी प्रथमा पुरा ।
तस्याभ्यर्थनमाकर्ण्य संविचार्य महीपतिः ॥ १०८ ॥

सेनापतिं महावीर्यं जयावहमपास्य च ।
कथमस्याः सुतस्याद्य सैन्येशत्वं ददाम्यहम् ॥ १०९ ॥

इति व्याकुलचित्तस्य राज्ञो विज्ञाय हृद्गतम् ।
सुखदाऽसहमाना सा सपत्नीतनयश्रियम् ॥ ११० ॥

राजानमाश्रिता तस्य कार्यस्य विनिपातनम् ।
कर्तुं भर्तुर्मनोभीष्टं कृत्वा तत्प्रीतिभाजनम् ॥ १११ ॥

भूत्वा संबोध्य तत्कर्म क्षपयामीति निश्चिता ।
तन्निमित्तं परासङ्गसहाभूद्[1]भर्तुरङ्गना ॥ ११२ ॥

क्रमेणोदाहरिष्यामि तत्सर्वं च यथा कृतम् ।
सा सप्तसुतया पूर्वमश्रुतात्मविचिन्तिता[2] ॥ ११३ ॥

तां विहाय ततस्तस्या[3] मातुरन्तिकमभ्यगात् ।
सापि तां बहुधाभ्यर्च्य स्वासने चोपवेश्य च ॥ ११४ ॥

पप्रच्छागमनं प्रीत्या स्वालयं प्रति हर्षिता ।
श्रुत्वा तद्वचनं मन्दं विजने सुसमाहिता ॥ ११५ ॥

वक्तुं समुपचक्राम राज्ञोऽ(भि)लषितं शनैः ।
तव पुत्र्यां महाराजस्समासक्तोऽस्ति साम्प्रतम् ॥ ११६ ॥

---

१. 'मसहद्' इति मातृकायाम् ।

२. अश्रुतम् सप्तसुतया अगृहीतम् आत्मनो विचिन्तितं कार्योद्दिशः यस्यास्सा ।

३. तस्याः सप्तसुतायाः ।

तदर्थमागतास्म्यद्य त्वत्सकाशमनिन्दिते ।
राजा सर्वस्य लोकस्य महेन्द्रवरुणोपमः ॥ ११७ ॥

अस्माकमपि सर्वेषां पालकश्च प्रभुस्तथा ।
तस्येयं बुद्धिरुत्पन्ना सुतायां तव मानिनि ॥ ११८ ॥

अयुक्तमिदमित्युक्तो न शृणोति वचो मम ।
तेनोक्तं गच्छ तन्मात्रे निवेदय मदाशयम् ॥ ११९ ॥

सैवानयति तामद्य यद्यस्यानुग्रहो मयि ।
अस्तीति प्रेषितायाता[1] कुरु तस्य मनोरथम् ॥ १२० ॥

एवमुक्ता तु सा माता विचार्यात्मनि तन्मतम् ।
कथं कार्यं मया पुत्रि संसारोऽद्य विनाशितः ॥ १२१ ॥

भवज्जीवनहानिश्च न कुर्यां यदि तन्मतम् ।
इत्यालोच्य तदा पुत्रीमाहूयालाङ्कृतिच्छलात् ॥ १२२ ॥

मूर्ध्नि पत्ररसं[2] किञ्चिद्विलिप्य च मनोभ्रमम् ।
समुत्पाद्य सुतामाह राज्ञीयं समुपागता ॥ १२३ ॥

अनया सह भूपालवेश्म गत्वा विलोक्य च ।
आगच्छामो वयं पुत्रि मण्डनं कुरु चाङ्गके ॥ १२४ ॥

इत्युक्ता सा तदा स्वांगमलंकृत्याम्बरादिभिः ।
प्रयाणमकरोद्राजवेश्मदर्शनलालसा ॥ १२५ ॥

तां गृहीत्वा तदा राज्ञी मात्रा सह मुदान्विता ।
विवेश राजभवनमिदं पश्येति वादिनी ॥ १२६ ॥

---

१. आयातास्मि ।
२. वशीकरणार्थम् ।

इदं महानसगृहमिदं लक्ष्मीनिवेशनम् ।
भाण्डागारमिदं दिव्यमायुधागारमेव च ॥ १२७ ॥

धान्यागारं धनागारं वस्त्रागारमिदं त्विमे ।
वाजिवारणशाले द्वे इदं वाहनमण्टपम् ॥ १२८ ॥

चित्रशालामिमां पश्य शिल्पिशालां तथैव च ।
पानशालेयममला चन्द्रशालेय(म)द्भुता ॥ १२९ ॥

आस्थानमण्टपश्चायमयमादर्शमण्टपः ।
इदं शय्यागृहं हेमरत्नपर्यङ्कशोभितम् ॥ १३० ॥

इति क्रमक्रमेणैव दर्शयन्त्यो गृहाद् गृहम् ।
निन्युरन्तःपुरं रम्यं मुक्ताजालविभूषितम् ॥ १३१ ॥

स्वर्णप्रासादसम्पन्नं वैदूर्यमयवेदिकम् ।
काञ्चनस्तम्भसाहस्रसमुपेतं महाधनम् ।
दर्शयामासुरतुलं दर्शनीयमितस्ततः ॥ १३२ ॥

एतस्मिन्नन्तरे राजा जगामैको यदृच्छया ।
स्वमन्तःपुरमद्राक्षीत् तत्र सप्तसुतां तदा ॥ १३३ ॥

तां दृष्ट्वा मोहविवशः पाणिं जग्राह पाणिना ।
आलिलिङ्गे बलादेनां चुचुम्बाधरपल्लवम् ॥ १३४ ॥

ततः सा मृगशावाक्षी विकृष्य करमञ्जसा ।
बहिर्जगाम संत्रस्ता क्वणन्नूपुरमेखला ॥ १३५ ॥

राज्ञ्यानुगम्यमाना सा कथंचित्तेन मोचिता ।
हरिणीव विलोलाक्षी सभयं परिपश्यति ॥ १३६ ॥

इयं स्खलन्ती चकितं दिशः शनैर्विलोकयन्ती विचलद्विभूषणा ।
जगाम विस्रस्तकुचाञ्चला स्रवच्छ्रमाम्बुधाराप्लुतपीवरस्तनी ॥ १३७ ॥

गृहं गता पत्ररसप्रभावतो विमुच्य विज्ञानदशां स्मरातुरा ।
समैच्छदुर्वीविभुनाथमेलनं प्रकृष्टसंभोगसुखाभिलाषिणी ॥ १३८ ॥

निमज्य चित्राम्बररत्नभूषणैर्विभूषिता धूपितकेशसञ्चया ।
सदङ्गरागाञ्चितदेहसौरभप्रपूरिताशा विलसद्विशेषका ॥ १३९ ॥

कदायमस्तं प्रति यातु भानुमान् कदेयमायाति सखीव शर्वरी ।
कदाहमेष्यामि महीश्वरालयं कदा नु तत्तल्पमुपैमि संयुता ॥ १४० ॥

इतीव मोहाकुललोलमानसा विकाङ्क्षमाणा रजनीसमागमम् ।
विलोकयन्ती मुकुरे मुखं मुहुः प्रलोभिता यातुमियेष सा नृपम् ॥१४१॥

कामशास्त्रोदिताः पत्ररसमन्त्रादिकाः क्रियाः ।
किं न कुर्युः स्त्रियं वश्यामपि साक्षादरुन्धतीम् ॥ १४२ ॥

इयं सद्गुणाप्यङ्गना मन्त्रतन्त्रैस्तदा मोहिता त्याजिता ज्ञानमानैः ।
दुरूहान्विताभिद्रुतं[1] राजवेश्म प्रवेष्टुं तदेष्टे तदिष्टं विधातुम् ॥ १४३ ॥

एतस्मिन्नन्तरे भानुरस्ताद्रिं समुपेयिवान् ।
गाढान्धकारसंछन्न(न्ना) रजनी चाभ्यवर्तत ॥ १४४ ॥

रजन्यां संप्रवृत्तायां नक्षत्रेषूदितेषु च ।
तां नेतुं तद्गृहं शीघ्रं सुखदा समुपागमत् ॥ १४५ ॥

ततस्तया समाहूता मात्रा चानुगता सती ।
जगाम राजभवनं मदनेन विमोहिता ॥ १४६ ॥

---

१. °भिर्द्रुतम् इति मातृकायाम् ।

तामागतां नृपः प्रेक्ष्य शयनादुत्थितस्तदा ।
प्रत्युद्गम्य परामृश्य पाणिं जग्राह सत्वरः ॥ १४७ ॥

उत्क्षिप्य शय्यामानीय स्वाङ्कमारोप्य च स्तनौ ।
धृत्वा दृढं चुचुम्बाक्षिकपोलाधरमस्तकम् ॥ १४८ ॥

ऊरूहृदयपृष्ठेषु कृत्वा वै करताडनम्[1] ।
श्रुती च गलभागौ च मुहुः कृत्वा चपेटनम्[2] ॥ १४९ ॥

अधराक्षिकपोलमस्तके मदनान्तः(नार्तः) स्तनयुग्मकन्धरे ।
शयने विनिवेश्य तां प्रियां जगदीशो नु चुचुम्ब सम्भ्रमात् ॥ १५० ॥

ऊरू(र्वोः?)नितम्बजघनस्थलपृष्ठभागवक्षोजकक्षयुगहस्ततदीयमूले ।
गुल्फे कपोलयुगले करजक्षतानि कुर्वन्नृपः प्रियतमां रमयाम्बभूव ॥१५१॥

फालशीर्षभुजसत्कुचमध्ये जङ्घपादतलपृष्ठनितम्बे ।
कुञ्चिताङ्गुलिकरेण नृपोऽत्र पञ्चमांगुलमिति व्यतनोच्च ॥ १५२ ॥

एवं स बाह्यसंभोगैः कलास्थानावमर्शनैः ।
द्रवमुत्पाद्य बन्धाद्यै रतिमारभतादरात् ॥ १५३ ॥

आदौ समरतिं पश्चात्पुरुषायितमुत्तमम् ।
भ्रमणं चक्रकं चैव तथा संयुतबन्धनम् ॥ १५४ ॥

मायूरं गारुडं चैव कलावतरणं तथा ।
शङ्खं च मुकुलं चैव पल्लवं नागबन्धनम् ॥ १५५ ॥

---

१. विदेशीया कथेयं कविना न केवलं भारतीयांशैर्योजिता, किन्तु कामशास्त्रकुतुकिनो लाडखानस्य कृते कामशास्त्रनिदर्शनतया च वर्णिता ; अत्र प्रस्तुताः पारदारिक-वशीकरण-सांप्रयोगिकाद्यधिकरणीया विषया वात्स्यायनादिषु ग्रन्थकर्तुरेव ग्रन्थे अनङ्गरङ्गे च द्रष्टव्याः । करताडन-चन्द्रकला-सांभोगिकबन्धाद्या विषयाश्च तत्रैव वर्णिताः ।

२. सावशेषं वाक्यम् ; चुचुम्ब इत्युत्तरवाक्यादध्याहार्यम् ।

एकपादं च लम्बं च धेनुकं शौनकं तथा ।
क्रमात् सोऽशीतिबन्धांश्च बद्ध्वा रेमे तया नृपः ॥ १५६ ॥

ततः सा कामसिद्धान्तविदुषा विभुना तदा ।
लोलिता लालिता चापि द्राविता च शनैः शनैः ॥ १५७ ॥

हसितवदनपद्मा किञ्चिदुन्मीलिताक्षी
नखरलिखितवक्षोजातकक्षान्तराला ।
शिथिलितकचबन्धा दष्टबिम्बाधरोद्य-
त्करकलितदुकूला निर्गता स्वापगेहात् ॥ १५८ ॥

एवं निष्क्रम्य सा गत्वा स्वं वेश्म प्रविवेश ह ।
स्मरन्ती भर्तृसंयोगसौख्यं स्वात्मन्यनेकधा ॥ १५९ ॥

ततः प्रभाते धात्रीशस्सुखदामाह सादरम् ।
यथार्थनामा भवती सर्वदा नात्र संशयः ॥ १६० ॥

त्वत्कृतेनोपकारेण परितुष्टोऽस्मि मानिनि ।
वरं वरय सुश्रोणि यत्तेऽभिलषितं हृदि ॥ १६१ ॥

ददामि कृतकृत्यासीत्युक्ता सा नाथमब्रवीत् ।
वरं दास्यसि चेद्राजन् शृणु मेऽभीप्सितं परम् ॥ १६२ ॥

भोगिनीतनयं सैन्यपालं मा कुरु साम्प्रतम् ।
यदि तस्य ददासि त्वं सैन्यपालत्वमादरात् ॥ १६३ ॥

आवयोर्जीवितं नास्ति सपत्न्योर्भुवि कुत्रचित् ।
आवामपुत्रे तत्पुत्रे सैन्येशत्वमुपेयुषि ॥ १६४ ॥

बाधेत नौ सुतबलात् तस्मान्मा कुरु तत्प्रियम् ।
एवमुक्तस्तया राजा विचार्य मनसा बहु ॥ १६५ ॥

तथेत्यङ्गीचकाराथ तस्याः प्रियचिकीर्षया ।
एतदर्थं (हि ?)सा देवी राज्ञो हितकराभवत् ॥ १६६ ॥

नो चेत्कथं हि शक्ष्येत कर्तुमेतादृशीं क्रियाम् ।
स्वसौख्यविमुखीमन्यासौख्यसम्पत्प्रदायिनीम्[1] ॥ १६७ ॥

ततः स राजा प्रतिपद्य तत्सुखं
मनोजपूजां परमां समाप्य च ।
मुनीशशापात्तमहाघमात्मनः
परापहं[2] प्राप पराङ्गनारतात् ॥ १६८ ॥

इति श्रीमदयोध्यापुराधिनाथसकलकलासनाथविद्वज्जनजेगीयमानगाना-
वधानदानजितकानीनलाडखानप्रधान-कुकविहृद्भल्ल-कल्याण-
मल्लविरचिते सुलैमच्चरित्रे दावूदुमनोरथावाप्तिर्नाम
द्वितीयः पटलः ॥

॥ अथ तृतीयः पटलः ॥

अथ सप्तसुता राज्ञा सह सत्कारसत्कृता ।
न्यवसत्पं(च)बाणोग्रसंग्रामाभिरता सदा ॥ १ ॥

एवं प्रवर्तमानैव दावूदोर्गर्भमाप सा ।
तं दृष्ट्वा भयसंत्रस्ता तन्माता रहसि स्थिता ॥ २ ॥

सुखदां तां समानीय कथयामास तद्विधम्[3] ।
सा च दृष्ट्वा तथाभूतां राज्ञोऽन्तिकमुपागमत् ॥ ३ ॥

---

१. अन्यस्त्रिया सह संयोगसंपत्प्रदायिनीं क्रियामिति योजना ।
२. परलोकघ्नमित्यर्थः । ३. तत्प्रकारम् ।

भर्तुर्विज्ञापयामास सैवं[1] जातेति सोऽपि तत् ।
निशम्य चिन्तयामास कथं कार्यमिदं मया ॥ ४ ॥

तद्भर्तुर्युद्धलुब्धस्य यातस्येतो[2]ऽतिचक्रमुः ।
चत्वारः सहसा मासाः गर्भस्त्रैमासिकोऽभवत् ॥ ५ ॥

कार्यार्थीव रणात्तूर्णं तमा[3]नीय सुसत्कृतम् ।
आप्रसूतेस्तमत्रैव स्थापयामि ततः परम् ॥ ६ ॥

अपवादो ममात्यर्थं विनश्येत तथा पुरा ।
स चापि कृतकृत्यश्च भवेद्धानिश्च नो[4] भवेत् ॥ ७ ॥

इति निश्चित्य मनसा चानयामास तं रणात् ।
स चाभ्येत्य नृपं दृष्ट्वा पृष्ट्वा चापि निरामयम् ॥ ८ ॥

संग्रामवृत्तमावेद्य राज्ञा च बहुमानितः ।
गृहं गत्वा बहिर्द्वारनिवेशे नि(न्य)वसत् सदा ॥ ९ ॥

अत्रैव भोजनादीनि सर्वकर्माण्यकारयत् ।
विवेशान्तःपुरं नैव भार्यामपि च नैक्षत ॥ १० ॥

तच्छ्रुत्वा नृपतिस्तस्य मित्रानाहूय यत्नतः ।
ऊर्जस्वलः[5] किमर्थं स्वां भार्यां न प्रतिभाषते ॥ ११ ॥

कुतश्चान्तःपुरे वासं न करोति वा(वि)चार्यताम् ।
इति प्रतिसमादिष्टा गत्वा ते तद्गृहं तदा ॥ १२ ॥

---

१. सा सप्तसुता एवं सगर्भा ।
२. यातस्य इतः इति च्छेदः ।
३. तं सप्तसुता भर्तारम् ।
४. नो, न ।
५. सप्तसुतामर्ता ।

तमूचुः किमिदं मित्र यदा युद्धात्त्वमागतः ।
[1]तदाद्यन्तःपुरद्वारं न प्रवेक्षसि (प्रविष्टोऽसि?) तद्वद ॥ १३ ॥

इत्युक्तः कथयामास तेषां वृत्तान्तमादितः ।
राज्ञा यदा रणायाहं प्रेषितोऽस्मि तदात्मनि[2] ॥ १४ ॥

प्रतिज्ञां कृतवानस्मि रणशीर्षमितो गतः ।
अहत्वा समरे शत्रून् न विशामि गृहं पुनः ॥ १५ ॥

भार्यामुखं न पश्यामीत्यत्र शत्रुर्न मे हतः ।
मध्ये राज्ञा समाहूतः प्रतिज्ञामनुपालयन् ॥ १६ ॥

न प्रविष्टोऽस्मि भवनमेष मे निश्चयः परः ।
इति श्रुत्वा च ते गत्वा राज्ञे सर्वं न्यवेदयन् ॥ १७ ॥

ततः प्रभाते राजा तं समाहूय भवानितः ।
गच्छ युद्धाय युद्ध्यस्व शत्रून्छित्वा निवर्तय ॥ १८ ॥

इति राज्ञा समादिष्टः सत्वरं निर्ययौ गृहात् ।
गत्वा युद्धाय सन्नद्धश्चकार बहुधा रणम् ॥ १९ ॥

तस्मिन् गते ततो राजा बृहत्सेनापतेः पृथक् ।
जयावहस्य[3] लिखितं प्रेषयामास सत्वरम् ॥ २० ॥

ऊर्जस्वलं ससैन्यं त्वं रणशीर्षे निवेश्य च ।
शत्रुभिर्मारयस्वाशु नैव कार्या विचारणा ॥ २१ ॥

---

१. तदादि अन्तःपुर इति च्छेदः ।

२. आत्मनि स्वयम्, स्वगतम् ।

३. जयावहाय तदाख्याय ।

सेनानीस्तत्तदा दृष्ट्वा तथा कर्तुं मनो दधे ।
संग्राममत्यनिर्वाच्यं तत्राभूल्लोकंविश्रुतम् ॥ २२ ॥

युद्ध्यतामेव तेषां तु महान् कालोऽतिचक्रमे ।
एतस्मिन्नन्तरे तस्याः नव मासाऽतिचक्रमुः[1] ॥ २३ ॥

प्रसूता पुत्रमप्येषा सर्वारिष्टसमन्वितम् ।
दावूदुरपि तच्छ्रुत्वा चिन्ताव्याकुलितेन्द्रियः ॥ २४ ॥

न मुमोद शिशुं वापि नैवालोकितवान् तदा ।
स तस्य मरणं प्रेप्सुर्दैवं संप्रार्थयन् स्थितः ॥ २५ ॥

ते (ए?) तस्मिन्नेव काले तु योऽशपत्तं पुरा नृपम् ।
स मनः(मुनि)स्समुनुप्राप्तस्तं द्रष्टुमवनीश्वरम् ॥ २६ ॥

तमागतमभिप्रेक्ष्य प्रत्युद्गम्य यथाविधि ।
पूजयामास धर्मज्ञः स्वासने चोपवेशयत् (न्) ॥ २७ ॥

उपविश्य मुनिः प्राह राजानं गतसाध्वसः ।
पृच्छामि राजन् धर्मं त्वां विचिन्त्य वद निश्चितम् ॥ २८ ॥

कस्मिंश्चिन्नगरे कश्चिद्धनी म्लेच्छोऽवसत्पुरा ।
ऐश्वर्यमदमत्तश्च वृद्धिजीवी(वि?)कु (लो?)भवान् (द्भवः?)[2] ॥ २९ ॥

तस्मिन्नेव पुरे कश्चिच्छौद्रको[3]ऽप्यवसत्परः ।
दरिद्रो बहुपुत्रश्च कष्टजीवी कृषीवलः ॥ ३० ॥

स चैकदा वनं गत्वा भ्रमंस्तत्र यदृच्छया ।
प्रसूतं हरिणीपुत्रं सुप्तं कुञ्जे ददर्श ह ॥ ३१ ॥

---

१. सन्धिरार्षः । २. अथवा '°जीव्यकुतोभयः' इत्यपि पाठः स्यात् ।
३. शूद्रजातीयः ।

तं गृहीत्वा गृहं नीत्वा मृदुबालतृणाङ्कुरैः ।
विवर्धयामास शनैर्बालं पुत्रमिवौरसम् ॥ ३२ ॥

स च संवर्धितस्तेन व्यवर्धत दिने दिने ।
मृगशावः पुरे सर्वजनानाह्लादयन् गुणैः ॥ ३३ ॥

तत्र तत्र प्रदेशेषु रम्येषु तृणवत्सु च ।
विचचार चरन् घासं प्राङ्गणेषु गृहेषु च ॥ ३४ ॥

एवं निवसतस्तस्य नाशकालोऽप्युपागतः ।
हरिणस्य, दिने कस्मिन् जगाम म्लेच्छमन्दिरम् ॥ ३५ ॥

तस्मिन् दिने च तद्गेहं प्रापद्यन्त यदृच्छया ।
अभ्यागता दश तदा पूजार्हातिथयो वराः ॥ ३६ ॥

तान् दृष्ट्वा स तुरुष्कोऽपि भोजनार्थे न्यमन्त्रयत् ।
तान्निमन्त्र्य बहिर्गत्वा दृष्टवान् शौद्रकं मृगम् ॥ ३७ ॥

तं मृगं सहसा दृष्ट्वा नीत्वान्तःपुरमृद्धिमत् ।
हत्वा तन्मांसशाकेन तर्पयित्वाऽतिथीन् तदा ॥ ३८ ॥

स्वयं भुक्त्वा च संतृप्तो बभूव कुलपांसनः ।
तच्छ्रुत्वा शौद्रको गत्वा किं कृत्यं कृतवानसि ॥ ३९ ॥

अन्यायेन मदीयस्य मृगस्य हरणं भवान्[1] ।
तच्छ्रुत्वा दुर्मतिर्मूर्खः तुरुष्कस्तं प्रजग्निवान् ॥ ४० ॥

रुदन् स शौद्रको यातः स्ववेश्म विकलेन्द्रियः ।
एवं त्वद्विषये राजन् अधर्मः संप्रवर्तितः ॥ ४१ ॥

कथं शिक्षा प्रकर्तव्या वद निश्चित्य मानसे ।
तच्छ्रुत्वा राजशार्दूलो निश्चित्य मुनिमब्रवीत् ॥ ४२ ॥

---

१. कृतवानित्यध्याहार्यम् ।

वधादन्यत्किमस्तीह शिक्षणं तस्य दुर्मतेः ।
वध्यो हि स हि (सु?)दुष्टात्मा परद्रव्यापहारकः ॥ ४३ ॥

तच्छ्रुत्वा तं मुनिः प्राह निर्भयेनान्तरात्मना ।
शृणु राजन् भवानेव कृतवान् पापमीदृशम् ॥ ४४ ॥

ऊर्जस्वलं रणे हत्वा तज्जायासंग्रहात्पुनः ।
त्वमेकस्सर्वलोकानामीश्वरो भाग्यवान् वशी ॥ ४५ ॥

बहुभार्यश्च ते भृत्यस्सेनापतिररिन्दमः ।
ऊर्जस्वलोऽल्पभाग्यश्च परपत्नीपराङ्मुखः ॥ ४६ ॥

तस्य भार्या गुणवती पातिव्रत्यपरायणा ।
त्वया बलाद्धृता मन्त्रतन्त्रपत्ररसादिभिः ॥ ४७ ॥

नीचोपायैर्वशं नीता तद्भर्ता मारितो रणे ।
नैवास्त्येतादृशं पापं ब्रह्महत्यासमं भुवि ॥ ४८ ॥

त्वयैवाचरितं ह्यस्य ब्रूहि निष्कृतिमात्मनः ।
एतच्छ्रुत्वा मुनेर्वाक्यं राजा भीतो विमृश्य सः ॥ ४९ ॥

नैवोत्तरं जगादात्मकिल्बिषापहताशयः ।
भीतं तं मुनिरालोक्य करुणान्वितमानसः ॥ ५० ॥

प्रोवाचेदं वचो भूपं मा भैस्त्वं नृपसत्तम ।
त्वयार्जितस्य पापस्य प्रायश्चित्तं वदाम्यहम् ॥ ५१ ॥

यं प्रसूता सुतं सप्तसुता त्वत्तः परंतप ।
तं सुतं तव पापस्य प्रायश्चित्तपशुं कुरु ॥ ५२ ॥

तथेत्यङ्ग्यकरोद्राजा बालो मृत्युमवाप सः ।
अनुज्ञाप्य च राजानं जगाम स्वाश्रमं मुनिः ॥ ५३ ॥

तस्मिन् मृते स राजेन्द्र परमामोदमेदुरः ।
उत्सवं कारयामास नगरे नागरैर्जनैः ॥ ५४ ॥

तं दृष्ट्वा मन्त्रिणः प्रोचुः किमेतच्चित्रमद्भुतम् ।
औरसस्ते सुतो मृत्युरा(मा)पन्नः सुन्दरः शिशुः ॥ ५५ ॥

खेदकाले समुत्पन्ने सन्तोषाप्तिः कुतस्तव ।
तच्छ्रुत्वा मन्त्रिणः प्राह राजा भोजोपमस्तदा ॥ ५६ ॥

जातः कोऽत्र मृतः कोऽत्र न दृष्टः कैश्चिदप्यसौ ।
[1]न जायते न म्रियते न तिष्ठति न गच्छति ॥ ५७ ॥

अजोऽयं शाश्वतो जीवः स्वयं कैश्चिन्न हन्यते ।
देहं कर्मवशाद्गृह्य[2] त्यक्त्वायाति ततः परम् ॥ ५८ ॥

नरो नवाम्बरं गृह्य जीर्णाम्बरमिवावनौ ।
अनेकेषु च गर्भेषु निवसन्निष्क्रमन्[3] पुनः ॥ ५९ ॥

संभ्रमत्ययमत्यर्थं विरामो नास्ति कुत्रचित् ।
पितरो मातरो भार्या भ्रातरो बान्धवास्तथा ॥ ६० ॥

कति स्युरस्य जन्मानि कति वा स्युर्धरातले ।
को वा पुत्रश्च का पुत्री स्वयं कः कुत्र चागतः ॥ ६१ ॥

अविद्यावशगो मत्तो न विजानाति तद्विधम्[4] ।
जाते प्रमोदस्तस्मिंश्च मृते खेदोऽनुभूयते ॥ ६२ ॥

[5]नरैः किमिदमाश्चर्यं द्वयं तुल्यं न किं क्षितौ ।
जातस्य मरणं चैव मृतस्य जननं पुनः ॥ ६३ ॥

---

१. गीतानुसारीणि वाक्यानि । २. आर्षः प्रयोगः । ३. अपशब्दः । ४. तत्प्रकारम् । ५. 'नरैः' इति पूर्वश्लोकस्थेन अनुभूयत इत्यनेनान्वयः ।

अनिवार्यमिदं लोके सर्वैरपि सुरासुरैः ।
तस्मात्प्राज्ञो द्वये चापि तुल्यदुःखसुखो भवेत् ॥ ६४ ॥

तस्मान्मे तत्क्षये शोको नैवासीन्मन्त्रिसत्तमाः ।
इति श्रुत्वा गतामात्या[1] राजापि सुखमावसत् ॥ ६५ ॥

ततस्सप्तसुतैकस्मिन् दिवसे काममोहिता ।
भर्तृसंयोगमन्वि(वै)च्छत् काले बहुगते तदा ॥ ६६ ॥

सुगन्धतैलमभ्यङ्गं कृत्वा स्नात्वा यथाविधि ।
अमूल्यं विमलं स्वर्णमंशुकं परिधाय च ॥ ६७ ॥

रक्तकञ्चुकमध्यस्थकुचकुम्भा कृशोदरी ।
ताम्बूलरागसंरक्तमधुराधरपल्लवा ॥ ६८ ॥

सर्वावयवसंफुल्लकुसुमायुत(यित ?)यौवना ।
रम्भेभकरसंकाशलसदूरुयुगान्विता ॥ ६९ ॥

सिंहमध्या पृथुश्रोणी साञ्जनाक्षिद्वयोज्ज्वला ।
लावण्यवार्धिसञ्जाततरङ्गाभवलित्रया ॥ ७० ॥

गम्भीरनाभिविवरा पुष्पालंकृतमूर्धजा ।
किङ्किणीजालसंछन्नमेखलादामभूषिता ॥ ७१ ॥

मुक्ताहारलसत्कण्ठा हैमग्रैवेयराजिता ।
कर्णभूषणसंकीर्णश्रोत्रद्वयविशोभिता ॥ ७२ ॥

मुक्तागुलुच्छसम्पन्ननासाभूषणभूषिता ।
देदीप्यमानसौवर्णसीमन्तमणिमण्डिता ॥ ७३ ॥

---

१. 'इत्यमात्या गताः श्रुत्वा' इति स्यात् ।

रत्नकाञ्चनसंयुक्तकेयूरद्वयभासिता ।
नवरत्नवरैर्नद्धकङ्कणप्रोल्लसच्छया ॥ ७४ ॥

अङ्गुल्याभरणोपेतकरशाखाप्रकाशिता ।
क्वणन्नूपुरसंयुक्तपदद्वयविकासिता ॥ ७५ ॥

कुङ्कुमाञ्चितकस्तूरीतिलकोद्भासिताननना ।
घनसारपटीराम्बुघृष्टचन्दनचर्चिता ॥ ७६ ॥

पञ्चास्त्रशस्त्रसंभिन्नहृदया मदविह्वला ।
यदृच्छयैव गां प्राप्त(प्ता) रम्भेव कृतविस्मया ॥ ७७ ॥

दावूदुभवनं प्राप्ता सर्वावयवशोभिता ।
तां विलोक्य महीपालः साक्षाच्चान्द्रीमिव श्रियम् ॥ ७८ ॥

विसिष्मिये तदीयाङ्गसौन्दर्यरसमोहितः ।
अनिमेषं विलोक्यैनामुवाच जगतीपतिः ॥ ७९ ॥

किमिदं ते वरारोहे रूपमद्भुतदर्शनम् ।
अदृष्टपूर्वं हि मया चेयं रूपं हि कुत्रचित् ॥ ८० ॥

[1]कुतोत्पन्नमिदं रूपसौन्दर्यं तव मोहिनि ।
वदैतत्कारणं सुभ्रूः पृच्छतो मम विस्तरात् ॥ ८१ ॥

इत्युक्ता सा तदा राज्ञा वाक्यमुत्तरमब्रवीत् ।
शृणु राजन् प्रवक्ष्यामि सौन्दर्यावाप्तिकारणम् ॥ ८२ ॥

अहं यदा त्वया दृष्टा तदा संप्राप्तयौवना ।
इदानीं प्राप्तसंपूर्णयौवनोद्भासितास्म्यहम् ॥ ८३ ॥

---

१. कुत उत्पन्नम् ; आर्षः सन्धिः ।

न यौवनसमः स्त्रीणामन्यो भूषणसंगमः ।
न भूषणसहस्रं वा यौवनेनोपमीयते ॥ ८४ ॥

यथा लतानां कुसुमं तथा स्त्रीणां हि यौवनम् ।
प्रकाशयति सर्वाङ्गं सौरभ्यमथ गच्छति ॥ ८५ ॥

तदा मध्यास्मि राजेन्द्र लज्जामन्मथमध्यगा ।
इदानीं च प्रगल्भास्मि कालातिक्रमणाद्विभो ॥ ८६ ॥

अधुना मे रतिप्रीतिरानन्दान्मोह एव च ।
विशेषेण च दृश्येते प्रागल्भ्यगुणसंभवौ ॥ ८७ ॥

एवं ब्रुवन्तीं तां मोहाद्बाहुभ्यां परिषस्वजे ।
नखदन्तक्षतैश्चैव पञ्चांगुलकपिद्ध(त्थ)कैः ॥ ८८ ॥

चपेटैर्विद्धकैर्बाह्यसंभोगं स चकार ह ।
संयोगैर्बन्धसंज्ञाकैरपि रेमे तया पृथक् ॥ ८९ ॥

एवं संक्रीडतस्तस्य तेजसा सा पराङ्गना ।
गर्भं दधार सुप्रीता साधुलोकसुखावहम् ॥ ९० ॥

तां दृष्ट्वा स कुलाचारक्रमेण नरपुङ्गवः ।
उद्वाहमकरोत्सर्वजनानां पुरतः पुनः ॥ ९१ ॥

ततस्तु नवमे मासि सूर्ये मेषस्थिते विधौ ।
केन्द्रगे च सुराचार्ये चन्द्रयुक्ते शुभे दिने ॥ ९२ ॥

सुमुहूर्ते सुनक्षत्रे प्रसूता सा सुतं वरम् ।
अरिष्टं[1] तत्त्विषा सर्वं रराजेन्दूदये यथा ।
प्रमुमोद जगत्सर्वं श्रुत्वा तच्च महोदयम् ॥ ९३ ॥

---

१. प्रसूतिगृहम्

अथ नरपतिर्हृष्टस्तत्(स्मिन्) प्रसिद्धसुतोत्सवे
कविनटभटग्रामीयाप्तेष्वनन्तधनं ददौ ।
परमरुचिरं भाग्यायत्तं प्रकाशकमव्ययं
सरसमकरोन्नाम श्रीमत्सुलैमनुसंज्ञि(ज्ञ)कम् ॥ ९४ ॥

इति श्रीमदयोध्यापुराधिनाथसकलकलासनाथविद्वज्जनजेगीयमानगाना-
वधानदानजितकानीनलाडखानप्रधान-कुकविहद्दल्ल-कल्याणमल्ल-
विरचिते सुलैमच्चरित्रे सुलैमत्प्रादुर्भावो नाम
तृतीयः पटलः ॥

॥ अथ चतुर्थः पटलः ॥

ततः सुलैमान् सञ्जातो व्यवर्धत दिनेदिने ।
बालचन्द्र इवात्यर्थं कलापूर्णोऽपि सोऽभवत् ॥ १ ॥

तोमरे च गदायुद्धे खड्गे धनुषि चर्मणि ।
बभूवाप्रतिमो द्वन्द्वे मल्लयुद्धे च बुद्धिमान् ॥ २ ॥

गाम्भीर्ये सागरो धैर्ये मेरुर्वीर्ये धनञ्जयः ।
सौन्दर्ये दर्पकाब्जारिनलचैत्राश्विनोपमः ॥ ३ ॥

काव्यालङ्कारतत्त्वज्ञः गानविद्याविशेषवित् ।
तर्कशास्त्रे नीतिशास्त्रे धर्मशास्त्रे रसेषु च ॥ ४ ॥

कलागजाश्वसामुद्रशास्त्रेषु परिनिष्ठितः ।
अष्टाङ्गयोगविद्वस्तुतत्त्वविज्ञाननिश्चितः ॥ ५ ॥

अखण्डानन्द(भो ?)गाब्धिमज्जमान[1]मनोम्बुजः ।
सर्वेन्द्रियार्थजेता च धर्मार्थार्जनतत्परः ॥ ६ ॥

सैन्यसंग्रहणे यत्तः प्रजापालनलालसः ।
बहुदानी बहुधनी रथकुञ्जरवाजिमान् ॥ ७ ॥

सर्वज्ञश्च वदान्यश्च सत्यवादी जितक्लमः ।
वृद्धसेवी जितक्रोधो दयादाक्षिण्यलक्षितः ॥ ८ ॥

स पित्रा दत्तसाम्राज्यः प्रतिलभ्य धुरं भुवः ।
चकार राज्यं धर्मेण नक्तंदिवमतन्द्रितः ॥ ९ ॥

एवं निवसतस्तस्य तारुण्यमभिवर्तत(ते) ।
ततोऽनुरूपां भार्यां सः परिणेतुं जगद्भ्रमन् ॥ १० ॥

[2]नीलानदीतटे दिव्यपट्टणे परमोज्ज्वले ।
[3]मिस्रा(त्रा ?)न्वये समुत्पन्नां सर्वावयवशोभनाम् ॥ ११ ॥

उपयेमे विशालाक्षीं मन्मथोऽथ रतिं यथा ।
सत्कृत्योद्वाहमत्यन्तसन्तोषाक्रान्तमानसः ॥ १२ ॥

दुष्टनिग्रहणे यत्तो बभूव बलदर्पितः ।
पिशाचभूतभेतालराक्षसान् गृह्य वीर्यतः ॥ १३ ॥

मन्दुरासु[4] प्रवेश्यैनान् तासां द्वारेषु लाक्षया ।
स्वनामाङ्कितया भद्रमुद्रया चाऽभिमुद्रच च ॥ १४ ॥

मन्दुरास्तास्समुद्रेषु पातयामास नित्यशः ।
एतस्मिन्नन्तरे वार्धितीरे दाशपुरे महान् ॥ १५ ॥

---

१. आत्मनेपदं चिन्त्यम् । २. एगिप्तदेशे 'नैल्' इति ख्याताया नद्यास्तटे । ३. बैबिल्-ग्रन्थे एगिप्तदेशस्य 'मिस्रैम्' इति नाम ; अराबियभाषायां 'मिस्र' इति । फरो-आ-नामसु एगिप्तराजेषु २१-वंशीयस्य अन्तिमस्य राज्ञः सुता सुलैमान्नाम्ना परिणीता ॥ ४. शयनीयार्थवस्तुषु पेटिकाकारेषु ।

धीवरो नि(न्य)वसत्कश्चित् कुटुम्बी बुद्धिमान् गुणी ।
तेन सङ्कल्पितं जालविक्षेपणमहं तदा ॥ १६ ॥
त्रिवारं सागरे चैकदिने कार्यं न चाधिकम् ।
तेन यल्लभ्यते तेन नित्यं जीवामि भूतले ॥ १७ ॥
इति निश्चित्य मनसा तथैव कृतवान् सदा ।
अह्नै(थै)कस्मिन् दिने जालं क्षिप्तवान् प्रातरेव हि ॥ १८ ॥
तदा न किञ्चित्पतितं मध्याह्ने पुनरक्षिपत् ।
तदा न किञ्चित्पतितं सायाह्ने पुनरक्षिपत् ॥ १९ ॥
तदा जालमुखादेका मन्दुरा निर्गता बहिः ।
तां गृहीत्वा मुखद्वारलाक्षामाकृष्य मुद्रिताम् ॥ २० ॥
विवरं विदधे तस्मिन् महाधूमो विनिष्क्रमत्[1] ।
स च धूमः क्रमात् सर्वा दिशो व्याप्य च रोदसी ॥ २१ ॥
पुपूरे तेन तिमिरमुत्पन्नं गाढमञ्जसा ।
ततस्तत्सर्वमाहृत्य मन्दुरोपरि सम्बभौ ॥ २२ ॥
राक्षसः कश्चिदत्यन्तभीकरास्यो महातनुः ।
स तं धीवरमालोक्य भीतः प्रोवाच मन्दवाक् ॥ २३ ॥
सुलैमन् पाहि पाहीति मां मा मारय मारय ।
तच्छ्रुत्वा प्राह दाशोऽहं सुलैमान्नास्मि पश्य माम् ॥ २४ ॥
तं दृष्ट्वाऽसौ तदा क्रोधाद्धन्तुं समुपचक्रमे ।
तं हन्तुमुद्यतं दृष्ट्वा धीवरो वाक्यमब्रवीत् ॥ २५ ॥
न मां हन (जहि) महाबाहो दासोऽस्मि तव सांप्रतम् ।
पृच्छामि किञ्चित्त्वामद्य संशयाद्ब्रूहि मां ततः ॥ २६ ॥

---

१. अपशब्दः

यथेच्छसि तथा पश्चाद् हन (जहि) राक्षससत्तम ।
मन्दुरान्(रा)निर्गतस्त्वं वा परो वा वद तत्त्वतः ॥ २७ ॥

तच्छ्रुत्वा प्राह तं दैत्यो नापरोऽहं विनिर्गतः ।
मन्दुराया इति श्रुत्वा दाशः प्रोवाच तं पुनः ॥ २८ ॥

कथं त्वं निर्गतस्तस्या मन्दुराया महातनुः ।
कथं वा तत्र संलीनो मृषैवाभाति तेऽद्य वाक् ॥ २९ ॥

यदि सत्यं पुनस्तत्र प्रविश्य सुमहद्(हा)ध्वनिम् ।
कुरुषे यदि तत्सत्यमिति मन्ये वचस्तव ॥ ३० ॥

तदाकर्ण्य तदा दैत्यः पश्य मामिति संवदन् ।
प्रविवेश स तां वेगात् मन्दुरां बहुबन्धुराम् ॥ ३१ ॥

तस्मिन् प्रविष्टे दाशोऽपि सुलैमन्मुद्रया बिलम् ।
पिधायाब्धौ प्रचिक्षेप बन्धुरां मन्दुरां ततः ॥ ३२ ॥

दैत्योऽथ तत्र निक्षिप्तो कृत्वा नादं महत्तदा ।
दाश मामुद्धराब्धेस्त्वं बहिः स्थास्यामि तेऽग्रतः ॥ ३३ ॥

इति ब्रुवन्तं तं दाशः प्रत्युवाच निशाचरम् ।
यद्यहं त्वां निशाटेन्द्र[1] उद्धरामि पयोनिधेः ॥ ३४ ॥

मम प्राणान् तथैव त्वं हरिष्यसि न संशयः ।
पुरा कश्चिद्धराधीशः स्वरोगघ्नं चिकित्सकम् ॥ ३५ ॥

यथाहनत्[2] तथैव त्वं कृतघ्न भुवि देहिनः ।
तच्छ्रुत्वा राक्षसः प्राह कथयेमां शुभां कथाम् ॥ ३६ ॥

---

१. विसन्धिदोषोऽत्र । २. अहन् इति भवितव्यम् ।

कोऽसौ राजा स वैद्यश्च कश्च रोगश्च कोऽभवत् ।
किमर्थमुपकर्तारं सोऽहनद्[1] वद मेऽनघ ॥ ३७ ॥

तमाह धीवरो वक्ष्ये शृणु चेमां कथां वराम् ।
पारशीकाभिधे देशे महान् राष्ट्रविवर्धनः ॥ ३८ ॥

उवास कश्चिद्भूमीशो महाबलसमन्वितः ।
तस्यैवं वर्तमानस्य पूर्वकर्मवशाद्रुजा ॥ ३९ ॥

बभूव बृहती राजा तयापहृतविग्रहः ।
तच्छान्त्यै चानयामास चिकित्साशास्त्रकोविदान् ॥ ४० ॥

वैद्यान् बहून् तदा तेषु कश्चित्प्राह महीपतिम् ।
अहं निवारयिष्यामि रुजं ते नरपुङ्गव ॥ ४१ ॥

सूक्ष्मोपायेन राजेन्द्र यदि त्वं मन्यसे हितम् ।
कन्दुकं चौषधीयुक्तं दण्डं चापि ददाम्यहम् ॥ ४२ ॥

तौ गृहीत्वा भवान्नित्यं क्रीडां कुरु यथासुखम् ।
यदा चोत्पद्यते स्वेदस्तव देहे महीपते ॥ ४३ ॥

तदा चोष्णोदकेन त्वं स्नानं कुरु दिनेदिने ।
एवं हि क्रियमाणस्य तव दण्डौषधीबलात् ॥ ४४ ॥

क्रमेण क्षयमाप्नोति रोगस्तव शरीरगः ।
तच्छ्रुत्वा स च भूपालस्तथैव कृतवान् तदा ।
क्रमाद्रुजापि नष्टाभूत्तस्य राज्ञः शरीरगा ॥ ४५ ॥

ततः स राजा विगतामयव्रणो रराज तेजोमयभव्यविग्रहः ।
विधुर्यथा राहुमुखाद्विनिर्गतः स्वमण्डलोद्भासिततत्कलान्वितः ॥ ४६ ॥

---

१. अहन् इति भक्तिव्यम् ।

अलङ्कृतस्सुन्दरभूषणांशुकप्रफुल्लमल्लीसमुदायचन्दनैः ।
सभां समासाद्य विवेश काञ्चनप्रकृष्टरत्नस्थगिते वरासने ॥ ४७ ॥

ततो(थो)पविश्योत्तमन्त्र(त्तममन्त्रि)सैन्यपप्रधानभृत्यायुधभृद्भटान्विते ।
सभान्तरेऽनन्तमणिप्रदीपिते त्रिविष्टपे निर्जरराडिवोज्ज्वले ॥ ४८ ॥

तमाप्तमत्यन्तरुजापहं बुधं चिकित्सकं चोत्तमशास्त्रपारगम् ।
निवेश्य तत्रोन्नतवाजिवारणैर्धनैर्दुकूलैर्विविधैरपूजयत् ॥ ४९ ॥

तस्यालयं चैव निवेद्य किञ्चिद्धनं च धान्यं च समर्प्य भूमिम् ।
दत्वान्वहं चापि दयावलोकनैर्निरीक्षमाणोऽभिररक्ष तं विभुः ॥ ५० ॥

एवं प्रभुसमीपे तं वसन्तं प्रेक्ष्य दुर्मनाः ।
अमात्यः कश्चिदत्यन्तपापी कोपसमन्वितः ॥ ५१ ॥

असहन्[1] तस्य सौभाग्यं रहसि प्रभुमब्रवीत् ।
राजन् ! अयं भिषक् दुष्टस्त्वदीय इव चालपन् ॥ ५२ ॥

त्वद्रिपून् सेवते नित्यं तेभ्यो वदति ते स्थित(ति)म् ।
शत्रुपक्षगतं वैद्यं शत्रुं मत्वा विशांपते ॥ ५३ ॥

शीघ्रमस्य वधोपायं विचिन्तय निजान्तिके ।
वसेत्सर्पेण वा युक्तो वसेद्व्याघ्रेण वा रहः ॥ ५४ ॥

वसेद्वैश्वानरेणापि न वसेच्छत्रुसेविना ।
मर्यादैषा हि निर्णीता नीतिशास्त्रेषु सर्वतः ॥ ५५ ॥

तस्माच्छत्रुगतं पापं मृत्युं प्रापय दुर्मतिम् ।
इत्युक्तोऽमात्यवर्येण विहस्य नरपुङ्गवः ॥ ५६ ॥

---

१. असहमान इति भवितव्यम् ।

मन्त्रिणं प्राह सञ्चिन्त्य सम्यगुक्तं त्वयाधुना ।
मम प्राणप्रदो वैद्यस्ततः प्राणप्रियो मम ॥ ५७ ॥

नायं शत्रुगतस्तूष्णीं वक्ष्यसि त्वं दुरूहया ।
असहन्[1] तस्य सौभाग्यं भेदं कर्तुं व्यवस्थितः ॥ ५८ ॥

यदि तेऽहं वचः कुर्यां तेनैव सह मे मृतिः ।
भूयान्मैवात्र सन्देहः शृणु वक्ष्यामि ते पुरा ॥ ५९ ॥

सिंहनाद इति ख्यातो महानेको महीपतिः ।
राज्यं चकार धर्मेण पितृपैतामहं महत् ॥ ६० ॥

तस्य भार्याद्वयं चासीत् रूपेणाप्रतिमं भुवि ।
तत्राग्रमहिषी राज्ञः प्रसूतात्यन्तसुन्दरम् ॥ ६१ ॥

कुमारं मन्मथाकारं कुमारसमविक्रमम् ।
स च संवर्धितः पित्रा मात्रा चापि दिनेदिने ।
व्यवर्धत शशीवाशु शुक्लपक्ष इवाम्बरे ॥ ६२ ॥

स च मातुर्यवीयस्याः गृहं कार्यवशाद्गतः ।
तं विलोक्य तदा तन्वी मुमोह मदनातुरा ॥ ६३ ॥

शीघ्रमुत्थाय तं गाढं परिष्वज्योपवेश्य च ।
प्राहाद्य मे तपः सत्यं फलितं तव दर्शनात् ॥ ६४ ॥

कदा मद्गेहमायाति कदा पश्यामि तं रहः ।
इति प्रतीक्षमाणाहं स्थितास्मि प्रत्यहं गृहे ॥ ६५ ॥

अद्यागतोऽसि मे कामं पूरयानङ्गसङ्गरे ।
अप्राप्याहं न मुञ्चामि कामं चामीकरप्रभ ॥ ६६ ॥

---

१. असहमान इति भवितव्यम् ।

त्वां रूपनिर्जितानङ्गं शृङ्गाररसविग्रहम् ।
तदाकर्ण्य हरी[1]त्युक्त्वा कर्णौ तूर्णं पिधाय सः ॥ ६७ ॥

प्राह प्रकम्पिताद्यन्तशरीरः सादरं वचः ।
मातः किमिदमाश्चर्यमवाच्यमतिदारुणम् ॥ ६८ ॥

वक्ष्यसि त्वं वचः पापमश्राव्यमतिनिन्दितम् ।
त्वं पितुर्धर्मपत्नी मे मम माता यवीयसी ॥ ६९ ॥

नाहमर्हस्तथा वक्तुं त्वया मातः सुगर्हितम् ।
एवमुक्तापि सा दुष्टा यद्यदात्महितं भवेत् ॥ ७० ॥

तत्सर्वमकरोन्मोहान्न चास्य चलितं मनः ।
यदा चाकार्यकरणे प्रवृत्ता सा दुरीहया ॥ ७१ ॥

तदायं सहसोत्थाय प्रयातुमुपचक्रमे ।
प्राह मामवमान्याशु गच्छसि त्वं कुलाधम ॥ ७२ ॥

प्राप्स्यस्यद्य फलं सद्यो गच्छ गच्छ यथासुखम् ।
एवमुक्त्वा तमुत्थाय क्रोधागारं विवेश सा ॥ ७३ ॥

विमुच्याभरणं सर्वं वस्त्रालङ्कारपूर्वकम् ।
मलिनाम्बरसंवीता रुदन्ती मुक्तमूर्धजा ॥ ७४ ॥

रोषारुणितनेत्रान्ता पतिता तत्र भूतले ।
तत्रैत्य स धराकान्तस्तां दृष्ट्वा रुदतीं प्रियाम् ॥ ७५ ॥

पप्रच्छ किमिदं भद्रे शोकोत्पादनकारणम् ।
वद शीघ्रं वरारोहे करिष्यामि तव प्रियम् ॥ ७६ ॥

---

१. पापहरणार्थं हरेर्भगवतो नामग्रहणम् ।

तच्छ्रुत्वा प्राह दुर्वृत्ता भेदयन्ती पतिं शनैः ।
किं ब्रवीम्यहमद्य त्वत्पुत्रस्य दुरनुष्ठितम् ॥ ७७ ॥

बलान्मद्देहमाविश्य कराभ्यां मत्पयोधरौ ।
प्रगृह्याधरमास्वाद्य गाढमालिङ्ग्य सत्वरम् ॥ ७८ ॥

अकार्यं कर्तुमारब्धः शासितश्च मया तदा ।
आच्छादिताम्बरं त्यक्त्वा गतः पश्येदमम्बरम् ॥ ७९ ॥

तच्छ्रुत्वा सहसोत्थाय रोषारुणितलोचनः ।
बहिरागत्य दूतेभ्यः सुतस्य वधमादिशत् ॥ ८० ॥

तदा तद्वृत्तमाकर्ण्य मन्त्री राजानमब्रवीत् ।
सम्यक्कृतं त्वया भूप पुत्रमारणशासनम् ॥ ८१ ॥

कनिष्ठा वचनं श्रुत्वा सा पत्नीर्ष्योदितं मुहुः ।
अविचार्यैव यः कुर्यात्कार्यं क्रोधवशानुगः ॥ ८२ ॥

स पश्चात्तप्यते मूढः परिक्षीणमनोरथः ।
भवानिव पुरा कश्चित् वैश्यः क्रोधगुणान्वितः ॥ ८३ ॥

शुकं शुकसमं[1] कोपादित्वर्या[2] भार्यया कृतम् ।
कृत्रिमं त्वविचार्यैव हत्वा तं देव भाषिणम् ॥ ८४ ॥

पश्चाद्विज्ञाय भार्यायाश्चारित्रं लोकगर्हितम् ।
शुकं स्मृत्वा ममाराशु शोकोपहतचेतनः ॥ ८५ ॥

तद्वत्त्वमपि राजेन्द्र भविष्यसि न संशयः ।
इत्यमात्यवचः श्रुत्वा राजा प्रोवाच तं तदा ॥ ८६ ॥

---

१. ज्ञाने शुकाचार्यसमम् २. व्यभिचरन्त्या ।

ब्रूहि मन्त्रिन् कथामेतां कोऽसौ वैश्यः कथं शुकम् ।
भार्याकृत्रिममज्ञात्वा हतवानविचार्य सः ॥ ८७ ॥

आज्ञप्तः पार्थिवेनेत्थं प्रोवाचामात्यशेखरः ।
शृणु राजन् प्रवक्ष्यामि कथामेतां पुरातनाम् ॥ ८८ ॥

पुरा विशालनगरे धनदो नाम धार्मिकः ।
वैश्योऽवसद्बहुधनी स्वकुलाचारतत्परः ॥ ८९ ॥

तस्य कश्चिच्छुकं दिव्यं पञ्चवर्णं महौजसम् ।
नाविकः समुपानीय दत्तवान् द्वीपसम्भवम् ॥ ९० ॥

तं गृहीत्वा वणिग्दिव्ये काञ्चने रत्नमण्डिते ।
पञ्जरे न्यस्य विविधैः फलैः पुण्ड्रेक्षुजैर्गुडैः ॥ ९१ ॥

पुपोष निरतं पुत्रमिव सर्वगुणान्वितम् ।
सर्वभाषासु निपुणः सर्वविद्याविशारदः ॥ ९२ ॥

व्यवर्धत शुकः प्रीतिं जनयन्पालकस्य सः ।
तस्य भार्या विशालाक्षी रूपेणाऽप्रतिमा भुवि ॥ ९३ ॥

विभुं निरस्य सततं परकीया बभूव ह ।
बहिर्द्वारे सदा स्थित्वा कामिनः संप्रतीक्षती(ते) ॥ ९४ ॥

विपणिं गतवति नाथे विविधालंकारसंकुमुद(?) पङ्कम्[1] ।
कुंकुमचन्दनमिश्रं लिप्त्वा कुचयोः प्रयाति संकेतम् ॥ ९५ ॥

मदनभूतपराजितमानसा वदनराजितमौक्तिकचित्रका ।
सदनमागतकामुकमण्डली-हृदयरञ्जनमाचरती[2] बभौ ॥ ९६ ॥

---

१. विविधालंकारा मृगमदपङ्कम् इत्यत्रापेक्षितं पदद्वयम् ।
२. आचरन्ती इति भवितव्यम् ।

मधुरवचनैः कांश्चिद्यूनः कटाक्षविलोकनैः
विविधमधुराहारैः कांश्चिद्विशेषधनार्पणैः ।
घनकुचपरीरम्भैः कांश्चित्कटीतटसेवनैः
प्रतिदिनमियं सन्तर्प्यास्ते मनोभववैभवे ॥ ९७ ॥

एवं वसन्तीं गृहिणीं दिने दिने विलोक्य कीरः प्रचुकोप तां प्रति ।
गृहागतायाशु निवेदयद्[1] यथा तथा पुरा दृष्टमुपेत्य सो विशे ॥ ९८ ॥

तवेयं गृहिणी देव कुलटा चटुलाशया ।
अहर्दिवं परैः पुंभी रमते मिलिता मुदा ॥ ९९ ॥

यं यं पश्यति पुरुषं तरुणं शरणागतं परं पुरतः ।
तं तं परिरभ्य मुदा दत्वा रतं पुनः प्रेषयति ॥ १०० ॥

एवं प्रत्यहमन्तर्गृहवृत्तं बोधयन्तमनुवेलम् ।
हन्तुं शुकमात्मनि सा चिन्तामकरोत्सखीभिरन्वर्थम् ॥ १०१ ॥

श्रुत्वा शुकवचः सत्यं मन्वानो वैश्यसत्तमः ।
दारान् सन्ताडयामास तर्जनैर्भर्जनैर्मुहुः ॥ १०२ ॥

एवं सन्तर्जिता तस्य गृहिणी क्रोधसंयुता ।
उपायं कञ्चिदालोच्य शुकपञ्जरसन्निधौ ॥ १०३ ॥

चणकानुपले क्षिप्त्वा पिपेष ध्वनिमुद्वमन् ।
उपरिष्टाच्छुकस्याङ्गे ववर्षोदकविप्रुषः ॥ १०४ ॥

तिमिरे दीपमुद्दीप्य दर्पणं भ्रामयत्पुरः[2] ।
शिलाचक्रध्वनिं मेघरावं मेने शुकस्तदा ॥ १०५ ॥

अम्भः पृषत्कपतनं वर्षोदकममन्यत ।
दीपान्तिकादर्शपरिभ्रमणं विद्युदित्ययम् ॥ १०६ ॥

---

१. न्यवेदतद् इति भाव्यम् । २. '° दीप्याभ्रामयद्दर्पणं पुरः' इति स्यात् ।

मेने (त)तः समायातं वैश्यमाह स सादरम् ।
निशायां क्व स्थितोऽसि त्वं वृष्ट्या किं नु न चार्दितः ॥ १०७ ॥

रात्र्यां वृष्टिर्महत्यासीदित्युक्तः प्राह[1] तं खगम् ।
क्व वृष्टिः पतिता रात्र्यां शुक तूष्णीं[2] ब्रवीषि माम् ॥ १०८ ॥

मृषावादी भवानद्य विज्ञातं भाषितं तव ।
एवमेव पुरापि त्वमुक्तवानयि नित्यशः ॥ १०९ ॥

मञ्जायां प्रत्यपीत्युक्त्वा क्रोधरक्तान्तलोचनः ।
जघान दण्डमादाय शुकं कोपादथोरुजः ॥ ११० ॥

अविचार्य शुकं हत्वा दृष्ट्वा च गृहिणीगतिम् ।
पश्चात्तापसमायुक्तः शुकं स्मृत्वा रुदन् सदा ॥ १११ ॥

ममार चिन्तया वैश्यस्तथा त्वमपि भूपते ।
पुत्रं स्त्रियो वचः श्रुत्वा हत्वा यास्यसि दुर्गतिम् ॥ ११२ ॥

इत्युक्तोऽपि न जग्राह मन्त्रवाक्यं महीपतिः ।
हत्वा सुतं स्वयं चापि ममार परमातुरः ॥ ११३ ॥

एवं त्वदुक्त्या तं वैद्यं हत्वा यामि यमक्षयम् ।
वदन्नेवं स भूपालो दुर्मन्त्रवचनेरितः ॥ ११४ ॥

घातयध्वं[3] स तं वैद्यमिति भृत्यानुवाच ह ।
तदाकर्ण्य तदा वैद्यो राजानं प्राह सादरम् ॥ ११५ ॥

राजन् न मेऽस्ति सन्तापस्त्वदीरितवधोद्भवः ।
किं तु मे मानसं काचिच्चिन्ता सन्तापयत्यलम् ॥ ११६ ॥

---

१. °क्तोवाच इति मातृकायाम् । २. वृथा इत्यर्थः । ३. अपशब्दः

मद्गृहे पुस्तकं त्वेकमस्ति वैद्योपलक्षितम् ।
तदानीय प्रदास्यामि तव दिव्यौषधीमयम् ॥ ११७ ॥

तस्यावलोकनात्सद्यो मम विद्याखिला तव ।
समायाति ततो हत्वा मां महाराज मस्तकम् ॥ ११८ ॥

मदीयं पुरतः स्थाप्य[1] मुक्त्वा चापि च पुस्तकम् ।
यद्यत्पृच्छसि तत्सर्वं तव वक्ष्यति तच्छिरः ॥ ११९ ॥

भविता त्वं च सद्वैद्यः कृतकृत्यो भवाम्यहम् ।
तदाकर्ण्य समानीय पुस्तकं स च मन्दधीः ॥ १२० ॥

हत्वा वैद्यं च तच्छीर्षं पुरः स्थाप्य तदग्रतः ।
विमुच्य पुस्तकं यावत्पश्यत्यालिखितं पुरः ॥ १२१ ॥

तस्माद्विषं समुत्पन्नं ज्वालामालातिभीषणम् ।
तेन दग्धोऽथ भूमीशो ममार परमातुरः ॥ १२२ ॥

अहमप्येवमेव त्वामुद्धरन् सलिलादितः ।
त्वया हतो गमिष्यामि मृत्युलोकं न संशयः ॥ १२३ ॥

इत्युदीरितमाकर्ण्य दाशेन स निशाचरः ।
प्रमाणमकरोन्नैव[2] हन्मि त्वामिति निश्चितम् ॥ १२४ ॥

किं च ते द्रव्यलाभस्य मार्गं च प्रवदाम्यहम् ।
तच्छ्रुत्वा धीवरो मन्दं मन्दुरां बन्धुरां ततः ॥ १२५ ॥

आकृष्य मुद्रां निष्कास्य निर्गच्छेत्यब्रवीत्ततः ।
ततो बहिर्विनिर्गत्य राक्षसः प्रीतिसंयुतः ॥ १२६ ॥

तं दाशमुद्रहन्वेगादुत्पपात विहायसम् ।
स गत्वा दूरमध्वानं कस्मिंश्चिद्विपिनान्तरे ॥ १२७ ॥

---

1. मुहुः कृतोऽयमार्षः प्रयोगः । 2. नैव श्रद्दधे इत्यर्थः ।

चतुरः पर्वतान् तत्र चतुर्दिक्षु महोन्नतान् ।
तन्मध्ये विपुलं दिव्यं सरश्च कमलान्वितम् ॥ १२८ ॥

तत्र मत्स्यान् लसद्रूपान् पीतरक्तासितान् सितान् ।
दर्शयित्वा च तं दाशमब्रवीद्भूतले स्थितः ॥ १२९ ॥

सरस्यस्मिन् महामत्स्यास्सन्ति तेषु बलात्पृथक् ।
प्रत्यहं चतुरो मीनान् गृहीत्वा राजसन्निधिम् ॥ १३० ॥

नीत्वा [1]प्रदर्शयस्वाशु स त्वां संमान्य तान् स्वयम् ।
गृहीत्वा तव तन्मूल्यं ददाति प्रतिगृह्य तत् ॥ १३१ ॥

कुटुम्बभरणं कुर्वन् वस याम्यहमद्य वै ।
इत्युक्त्वाकाशमाविश्य जगाम स निशाचरः ॥ १३२ ॥

ततः स धीवरो मत्स्यान् चतुरः परिगृह्य च ।
जगाम राजभवनं राज्ञे तान् प्रददौ मुदा ॥ १३३ ॥

सोऽपि तान् प्रसमीक्ष्यैव मीनान् कान्तिसमुज्ज्वलान् ।
गृहीत्वा सूदमाहूय पचेत्यर्पयदञ्जसा ॥ १३४ ॥

धीवरस्यापि यत्किञ्चिद्दत्वा संप्रैषयद्गृहम् ।
ततः सूदस्स तान् गृह्य[2] पक्तुं भाण्डे विनिक्षिपत्[3] ॥ १३५ ॥

विनिक्षिप्य च तद्भाण्डं शिक्योपरि निधाय च ।
फूत्करोति यदा वह्निं तदा काचिद्वराङ्गना ॥ १३६ ॥

गृहभित्तिं विनिर्भिद्य बहिरागत्य वेगतः ।
मत्स्यभाण्डान्तिकं प्राप्य तान्मात्स्यानिदमब्रवीत् ॥ १३७ ॥

---

१. आत्मनेपदमबद्धम् ।
२. आर्षः प्रयोगः । ३. अपशब्दः ।

उद्योगं भवतां मत्स्याः कर्तुं व्यवसिताः किल[1] ।
इत्युक्तास्ते तथोत्थाय पुच्छाग्रेषु व्यवस्थिताः ॥ १३८ ॥

प्रोचुर्मातर्वयं सर्वे स्वोद्योगेषु व्यवस्थिताः ।
युष्मज्जये सदा चास्मज्जयो भवितुमर्हति ॥ १३९ ॥

युष्मत्पराजये चास्मत्पलायनमपि स्फुटम् ।
तच्छ्रुत्वा वचनं तेषां सा स्त्री तद्भाण्डमुन्मुखम् ॥ १४० ॥

अधोमुखं विधायाशु भित्तावन्तर्हिताभवत् ।
ततः सूदः समागत्य दृष्ट्वा भाण्डमधोमुखम् ॥ १४१ ॥

शल्यभूतांश्च तान् मत्स्यान् नीत्वा राज्ञे न्यवेदयत् ।
ततो द्वितीयदिवसे धीवरः पुनरानयत् ॥ १४२ ॥

मत्स्यान् तानपि संगृह्य पाचकाय ददौ प्रभुः ।
तस्मिन् दिने तथैवाभूत्तृतीयेऽह्नि तथानयत् ॥ १४३ ॥

सूदहस्ते स तान् दत्वा स च मन्त्रिणमादिशत् ।
यदा पचति सूदस्तान् तदा भित्तेर्विनिर्गमत् (र्गतः) ॥ १४४ ॥

राक्षसो विकृताकारो मत्स्यान् प्रत्याह तद्वचः ।
मत्स्यैरपि तथैवोक्तः ततो भित्तौ विवेश सः ॥ १४५ ॥

ततस्स राजा तद्वृत्तं श्रुत्वा विस्मितमानसः ।
प्रातर्दाशं समाहूय पप्रच्छ विजने स्थितः ॥ १४६ ॥

दाश मत्स्यास्त्वया कस्मादानीतास्सरसो वद ।
कुत्रास्ति तत्सरश्चापि कियद्दूरमितो भवेत् ॥ १४७ ॥

तच्छ्रुत्वोवाच राजेन्द्र नगरात्तव दक्षिणे ।
समीपेऽस्ति सरो यस्मादानीता जलजा मया ॥ १४८ ॥

१, भवन्तः इत्यध्याहार्यम् ।

इत्युक्तः प्राह[1] तं राजा विस्मयाकृष्टमानसः ।
तर्हि(तु) यामस्तं द्रष्टुं मया सह भवानपि ॥ १४९ ॥

इत्युक्त्वाश्वं समारुह्य जगाम नृपतिर्वनम् ।
तत्र गत्वा ददर्शाग्रे पर्वतान् चतुरोन्नतान्[2] ॥ १५० ॥

तन्मध्ये च सरो दिव्यं विपुलं विमलोदकम् ।
मीनान् चतुर्विधान् तत्र ददर्श शतशो नृपः ॥ १५१ ॥

तान् दृष्ट्वा स महीपालश्चिन्तयामास किन्विदम् ।
अभ्याशे नः पुरस्यैतत्सरोऽद्य परिदृश्यते ॥ १५२ ॥

गिरयश्च महोत्सेधाश्चत्वारो हेमकन्धराः ।
कदाचिन्न मया दृष्टा भ्रमता सततं वने ॥ १५३ ॥

आश्चर्यमिदमित्युक्त्वा पूर्वां दिशमवैक्षत ।
तत्रापश्यत्पुरीं दिव्यां नानामणिगणोज्ज्वलाम् ॥ १५४ ॥

नीलप्राकारसंवीतां गम्भीरपरिखोदकाम् ।
प्रासादजालैर्विततां तोरणैर्बहुभिर्युताम् ॥ १५५ ॥

निर्जनामर्चनैर्हीनां शून्यापणवणिक्पथाम् ।
हस्त्यश्वरथपादातवर्जितां तर्जितां परैः ॥ १५६ ॥

तां विलोक्य नगरीं विशां पतिः खड्गपाणिरविशत्पुरातनीम् ।
सौधपङ्क्तिमपि तत्र तत्र संश्लाघयन् परिचचार संभ्रमात् ॥ १५७ ॥

सच्चरन्नरपतिर्व्यलोकयद्देवहर्म्यमपरं सुविस्तृतम् ।
शातकुम्भमणिमण्टपान्वितं वज्रकुट्टिमतलं सुनिर्मलम् ॥ १५८ ॥

---

१. °क्तोवाच इति मातृकायाम् ।
२. चतुर उन्नतान् । दुष्टः सन्धिः ॥

तत्र दीनमतिदीनमानवप्रापितं[१] लपितमाशृणोन्नृपः ।
देव मां किमिति भूतले वृथा स्थाप्य पश्यसि हतार्थकायिनम्[२] ॥१५९॥

अचलदर्धशरीरममुं जनं विचलदिन्द्रियमिन्द्रहताद्रिवत् ।
कृपणमश्रुतसौख्यपरम्परं झटिति मारय मारय मां विभो ॥ १६० ॥

इति शतशो भगवन्तं प्रतिपदमभ्यर्थयन्तमतिहीनम् ।
नरपतिरभिवाद्य च तं कोऽसि(को नु)भवानित्यपृच्छदनुवेलम् ॥ १६१ ॥

स तं वीक्ष्य महाबाहुं राजानं तेजसावृतम् ।
जगाद हे महाभाग कस्त्वं कुत्रागतोऽसि मे ॥ १६२ ॥

पादयोश्चलनाभावात्प्रत्युत्थानादिकर्मणि ।
न योग्यतास्ति मे भासि भूपाल इव तेजसा ॥ १६३ ॥

पश्य मामर्धगात्रेण स्थितं दुःखमहाम्बुधौ ।
मज्जमानं[३] महारज्जुबद्धं कपिमिवोल्बणम् ॥ १६४ ॥

तं दृष्ट्वा प्राह भूमीशो वद तेऽङ्गविपर्ययम् ।
किमर्थमभवत्केन कृतमित्थं महीपते ॥ १६५ ॥

तच्छ्रुत्वोवाच राजेन्द्र शृणु वृत्तं ममाहितम् ।
अहमस्य पुरस्येशो भूत्वा धात्रीमपालयम् ॥ १६६ ॥

धर्मेण सर्वकर्माणि कुर्वन् राष्ट्रहिते रतः ।
एकस्मिन् दिवसे तल्पे शयानो मीलितेक्षणः ॥ १६७ ॥

ध्यानं गतोऽस्मि मां मत्वा निद्रितं मुद्रितेक्षणम् ।
मम सेवापरास्त्वेकामेका पप्रच्छ सादरम् ॥ १६८ ॥

---

१. °मानवतः प्राप्तम्, तादृशेन कृतमित्यर्थः । २. निरर्थदेहमृतम् इत्यर्थः ।
३. 'मज्जन्तम्' इति भाव्यम् ।

किमर्थमेनं राजानं तेजोरूपगुणान्वितम् ।
राज्ञी नेच्छति न प्रीतिमधिगच्छति भाषते ॥ १६९ ॥

विदितं चेत्तवात्यर्थं वद मे सखि सस्पृहम् ।
तच्छ्रुत्वा प्राह तत्रैका न विजानासि कारणम् ॥ १७० ॥

राज्ञोऽस्य भार्या दुर्वृत्ता नीचसङ्गरताऽधुना ।
कश्चित्पिशाचसदृशः कृष्णाङ्गो विकृतेक्षणः ॥ १७१ ॥

लोमशोऽस्याः प्रियोऽस्तीह तस्मिन् बद्धाशया हि सा ।
सुप्तेऽस्मिन् राज्ञि सलिलं संमन्त्र्यास्मै प्रयच्छति ॥ १७२ ॥

तत्पीत्वायं मृतप्रायो भूत्वा स्वप्स्यत्यहर्निशम् ।
ततश्चेयं यथाकाममाप्रभातं तदन्तिके ॥ १७३ ॥

स्थित्वा प्रभाते चागत्य विशत्यात्मगृहं पुनः ।
तस्मादस्मत्प्रभुं दुष्टं(ष्टा) नेच्छत्यन्वासितुं रहः ॥ १७४ ॥

यस्मादस्मिन् दृढस्नेहा विटे पाह(ट)चरे परे ।
एवं वदन्त्यां तस्यां तु सूर्योऽस्तमगमत्तदा ॥ १७५ ॥

शय्यातलादहं चापि समुत्थाय यथाविधि ।
कृत्वा सायाह्निकं कर्म पुनश्शय्यामुपागमम् ॥ १७६ ॥

ततो राज्ञी समागम्य मन्त्रितं वारि मे ददौ ।
पिबेति तद् गृहीत्वाहं पीतप्रायं विधाय च ॥ १७७ ॥

निक्षिप्य धात्र्यां निद्रालुरिव तूष्णीं विलोचने ।
निमील्य सुप्तस्सा शय्यातलादुत्थाय यास्यती ॥ १७८ ॥

आप्रभातं महानिद्रावशगो भव मन्दधीः ।
इत्युक्त्वा निर्ययौ गेहान्नीलमाच्छाद्य चाम्बरम् ॥ १७९ ॥

गृहीत्वा भक्ष्यभोज्यान्नपात्रीं ताम्बूलपेटिकाम् ।
ततोऽहमपि चोत्थाय गृहीत्वा खड्गमुत्तमम् ॥ १८० ॥

पश्चादनुगतस्तूष्णीमन्धकारेऽतिबन्धुरे ।
ततस्सा मृगशावाक्षी गत्वैकस्मिन्वनान्तरे ॥ १८१ ॥

लतागृहं प्रविश्याशु प्रोवाचेदं वचो रहः ।
स्वामिन्नागच्छ भक्ष्यान्नभोजनं कुरु मे प्रिय ॥ १८२ ॥

कालोऽतीत इति क्रोधं मा कुरुष्व मयि प्रभो ।
शत्रुरूपः स मे भर्ता शीघ्रं निद्रां न लब्धवान् ॥ १८३ ॥

तस्मात्कालात्ययो जातः क्षमस्व मम दुष्कृतिम् ।
उत्तिष्ठ नरशार्दूल कुरु मय्यतुलां कृपाम् ॥ १८४ ॥

इत्युक्त्वा पादयोरग्रे पपात भयविक्लवा ।
ततः सोऽप्युत्थितो भूत्वा विवेश जगतीतले ॥ १८५ ॥

तस्य पादौ सुशीतेन वारिणा सा सुगन्धिना ।
प्रक्षाल्य चन्दनेनाङ्गं विलिलेप मुदान्विता ॥ १८६ ॥

मल्लिकादाममासज्य कण्ठे करयुगे तथा ।
स्वर्णपात्रस्थितं चान्नं घृतशाकगुडान्वितम् ॥ १८७ ॥

पुरो निधाय सा तेन सहिता बुभुजे तदा ।
प्रक्षाल्य पाणी ताम्बूलं दत्वा पश्चाल्लतागृहे ॥ १८८ ॥

गाढमालिङ्ग्य तं कान्तं चुचुम्ब मदनातुरा ।
ततोऽहं खड्गमाकृष्य मन्दमाविश्य तद्गृहम् ॥ १८९ ॥

करवालेन तं हत्वा पृष्ठे तस्मादपाक्रमम्[1] ।
तूष्णीं गेहं समागम्य ह्यजानन्निव संस्थितः ॥ १९० ॥

---

१. अपशब्दः ।

ततः सा तं समालिङ्ग्य विद्धं खड्गेन दुःखिता ।
रक्तसिक्तं समुत्थाप्य शनैरानीय मन्दिरम् ॥ १९१ ॥

एकान्तमन्दिरे स्थाप्य परिचर्यापरायणा ।
[चिकित्सां कारयामास परिचर्यापरायणा ॥ १९२ ॥]

चिकित्सां कारयामास व्रतो(णो)पद्रवहारिणीम् ।
कदाचिदहमेकान्ते कोऽसौ यं त्वमहर्निशम् ॥ १९३ ॥

शुश्रूषसे निरातङ्कं खड्गच्छिन्नतनुं वद ।
इति पृष्टा रुषोत्थाय मामाह परुषं वचः ॥ १९४ ॥

त्वमेवैनं निशाकाले खड्गेन हतवानसि ।
पापिष्ठस्त्वमतस्तस्य पापस्य फलमाप्नुहि ॥ १९५ ॥

इत्युक्त्वा सलिलं गृह्य संमन्त्र्य च मुहुर्मुहुः ।
ममोर्वोरुपरि क्रोधाच्चिक्षेप पदयोरपि ॥ १९६ ॥

तदादि चरणौ जातौ शिलाप्रायौ गतिर्गता ।
नष्टं वीर्यं मतिर्भ्रष्टा शववत्पतितोऽस्म्यहम् ॥ १९७ ॥

स राजा तस्य तद्वृत्तं श्रुत्वा संचाल्य मस्तकम् ।
पश्यन् जगाम तद्गेहं गृहीत्वा खड्गमुज्ज्वलम् ॥ १९८ ॥

तत्रैकस्मिन् गृहे सुप्तमपश्यन्मलिनं कृशम् ।
दुर्गन्धतनुमत्यन्तनीलं पिङ्गललोचनम् ॥
कर्कशं विकृताकारं दावदग्धमिव द्रुमम् ॥ १९९ ॥

तं दृष्ट्वा खड्गपातेन छित्वा तस्य शिरोधराम् ।
कस्मिंश्चिदवटे क्षिप्त्वा शिश्ये तच्छयने स्वयम् ॥ २०० ॥

आच्छाद्य तस्य तद्वासः तूष्णीं राजा विलोकयन् ।
ततस्सान्नं समादाय सलिलं विमलं तथा ॥ २०१ ॥

समीपमुपसंगम्य स्नेहाद्वाचमुवाच ह ।
स्वामिन्नुत्तिष्ठ किं शेषे भोक्तुमन्नं मनोहरम् ॥ २०२ ॥

प्रक्षालयामि ते पादौ प्रसारय करौ तथा ।
गण्डूषं कुरु दन्तानां धावनं च समाचर ॥ २०३ ॥

मन्दभाग्यास्म्यहं नाथ त्वां द्रष्टुं कृतदुर्व्रणम् ।
किं करोमि क्व गच्छामि पापिना निहतो ह्यसि ॥ २०४ ॥

इति ब्रुवन्तीं तामाह शयानो जगतीपतिः ।
दैवं हि कारणं लोके सर्वं दैवेन हन्यते ॥ २०५ ॥

आगच्छ निकटं मन्दं मां समुत्थापय प्रिये ।
न मेऽस्ति शक्तिश्चोत्थातुं सारहीनोऽस्मि सांप्रतम् ॥ २०६ ॥

इत्युक्ता सा समागम्य समीपे समुपाविशत् ।
तथोत्थाय महाराजः खड्गेनास्या महच्छिरः ॥ २०७ ॥

चिच्छेद स महावीर्यः सा पपात ममार च ।
यदा हता सा दुर्वृत्ता तदैवास्याः (वैतर)पतेः पुनः ॥ २०८ ॥

चरणौ सम्यगायातौ रुजा नष्टा गतं भयम् ।
रराज स महावीर्यो राहुमुक्त इवोडुराट् ॥ २०९ ॥

ततः स राजानमुपेत्य सत्वरं कृतोपकारं सदयं महाबलम् ।
समालिलिङ्गे निपपात पादयोस्त्वमेव मे दैवमिति ब्रुवन्मुहुः ॥ २१० ॥

स तस्य पाणिं परिगृह्य पाणिना मुमोद तद्वक्त्रमवेक्ष्य सादरम् ।
कुतस्समुद्धर्तुमिहागतो भवानमुं जनं प्राप्तमहापदं रयात् ॥ २११ ॥

न मेऽस्ति माता न पिता न बान्धवा न सोदरो नैव च मेऽनुजीविनः ।
त्वमेव सर्वं मम रक्षणोद्यतः कृपाकरश्शास्त्रपुराणपारगः ॥ २१२ ॥

क्व चाहमत्यल्पतरो हतप्रभः प्रभुर्भवान् वीरवरः क्व चोन्नतः ।
क्व चेदमत्यन्तशिवालयं पुरं प्रशून्यमर्त्यामरवाजिवारणम् ॥ २१३ ॥

विधिर्भवन्तं मम रक्षणोद्यतः समानयन् मानधनं पुरीमिमाम् ।
न चेत्किमर्थं हि भवानिहागतो विहाय राज्यं बहुसौख्यसाधकम् ॥२१४॥

इतीर्यमाणे नृवरे नृपेण तत्सरोवरात्तत्पुरवासिनो जनाः ।
विमुच्य सद्यः शफरत्वमुत्सुकाः पुरीं समाजग्मुरनल्पविक्रमाः ॥ २१५ ॥

तुरङ्गमातङ्गशताङ्गपत्तयो ह्यजाविका गोमहिषोष्ट्रगर्दभाः ।
विहाय ते वारिचराकृतीर्मुदा पुरीं रयात्तां विविशुर्यथा पुरा ॥ २१६ ॥

निमेषमात्रेण बभूव सा पुरी धरामरक्षत्रियवैश्यपद्धटैः ।
महाधनैर्धान्ययुतैर्गृहापणैर्विराजिता जातकुतूहलैस्तदा ॥ २१७ ॥

ततः समेयुर्नृवरेण मन्त्रिणो नराश्च सेनापतयश्च नैगमाः ।
महीसुरा बाहुजवैश्यपादजा सभासदश्चामरछत्रपाणयः ॥ २१८ ॥

ततोऽस्तुवन् वन्दिगणाश्च मागधाः जगुः कलं गायकवैणिकादयः ।
सभां प्रचक्रुर्बहुधूपधूपितां हिरण्मयीं मौक्तिकदामवेष्टिताम् ॥ २१९ ॥

सकाञ्चनोदञ्चितरत्नचित्रिते परार्ध्यवर्णास्तरणोपशोभिते ।
महासने चोपविवेश सुन्दरे सभान्तरे पण्डितमण्डलीवृते ॥ २२० ॥

ततो(दो ?)पकर्तारममुं महीपतिं सभां समानीय निवेश्य चासने ।
प्रगृह्य चामीकरदन्तचामरं सितातपत्रं च जगाद भूपतिः ॥ २२१ ॥

त्वमस्य राष्ट्रस्य विभुर्वयं सदा तवास्म भृत्याः परिपालयस्व[1] नः ।
मदीयमङ्गं तव सत्कटाक्षजं हता त्वया मत्परिपन्थिनी प्रिया ॥ २२२ ॥

---

१. आत्मनेपदं चिन्त्यम् ।

गृहाण चेमानि धनानि वाहनान्यमूल्यदिव्याभरणानि च प्रभो ।
स एवमुक्त्वा धनरत्नभूषणैर्महार्हवस्त्रैर्विविधैश्च वाहनैः ॥ २२३ ॥

अपूजयद्भूपतिमाप्तकारिणं सभान्तरे तं स समुद्वहन् हृदा ।
ततस्स राजा कतिचिच्च वासरान् तदन्तिके सौख्ययुतोऽभियापयन्[1] ॥

जगाद चैनं नृप यामि मत्पुरीं प्रभात एवेति वदन्तमाह सः ।
शृणुष्व राजन् तव पूरितोत्तरे[2]व(ल)सत्यजलं द्विशते च योजने ॥२२५॥

त्वयेक्षितं यच्च सरोवरोदकं मृषेति तत्सर्वमवेहि मानसे ।
तया महिष्या मम मायया सरो महीधरा वारिचराः कृताः पुरा ॥२२६॥

पुरी गजा भूधरतां गताः प्रजा जलेचराश्चाप्यभवन् सरोवरे ।
मनोभवास्त्रान्निहतात्ममानसा चकार जारानुगतेच्छया तया ॥ २२७ ॥

दुराशया शून्यजनां महत्तरैरमोघमन्त्रैर्मणियन्त्रयन्त्रितैः ।
पुरीमकार्षीत् परिपूर्णसज्जनामनिच्छतीम्[3] मामभितश्च निर्जनाम् ॥२२८॥

त्वया महोपायविदा विनिर्जिता बलीयसी सा परमोपकारिणा ।
यतोऽहमार्येण सुरक्षितः पुरा ततो भवन्तं परिगृह्य ते पुरीम् ॥ २२९ ॥

त्वया समेष्याम्यहमप्यनन्तरं स सैन्यसैन्याधिपमन्त्रिसंयुतः ।
तत्रालये त्वां विनिवेश्य मत्पुरीं पुनस्समेष्यामि कृतार्थतां गतः ॥२३०॥

इत्युदीर्य नृपतिः स्वमन्त्रिभिः सैन्यपालभटसैन्यबन्धुभिः ।
छत्रचामरयुगेन वीजितो वन्दिमागधगणैश्च संस्तुतः ॥ २३१ ॥

स्वां पुरीमथ विवेश सत्कृतो पौरजानपदमन्त्रिभिर्नृपः ।
तत्र मित्रमतिमालगौरवान्नित्यमत्यनुपमान्नवित्तरैः ॥ २३२ ॥

---

१. कालमिति शेषः ।

२. इत उत्तरे; विसन्धिः; इत ऊर्ध्वमित्यर्थः । पूर्वं तत्पुर्या दक्षिणस्यां दिशि [वर्तमानत्वमुक्तम् ।

३. अपशब्दः ।

भक्ष्यभोज्यरसपानदापनैः प्रीतियुक्तमकरोद्धराधिपः ।
सोऽपि तत्र निवसद्(न्)यथासुखं मन्त्रिबान्धवजनैस्सहार्जि(र्चि)तः ॥२३३॥

एवं भूपतिराप्तमित्रमतुलैर्वस्त्रैर्महाभूषणै-
रश्वैर्वारणगोखरोष्ट्रमहिषीश्वाजाविकैर्विश्रुतैः ।
संपूज्यात्मजनैः समं स्वनगरीं संप्रेषयामास त-
द्भार्याकार्यमवार्यमात्मनि महाश्चर्येण संस्मारयन् ॥ २३४ ॥

इति श्रीमदयोध्यापुराधिनाथसकलकलासनाथविद्वज्जनजेगीयमान-
गानविद्यानिदानदानजितकानीनलाडखानप्रमोदसन्धान-
कुकविहृद्भल्लकल्याणमल्लमहाकविराजविरचिते
सुलैमच्चरित्रे चित्रकथापदानं नाम चतुर्थः पटलः ॥

॥ कविकण्ठाभरणम्* ॥

॥ श्रीकृष्णकविना विरचितम् ॥

वल्मीकजन्मनि मुनौ कृतसन्निधा (ना)
जिह्वाङ्गणात् समवतीर्य पुरा विधातुः ।
अग्रासनं कविषु या विततार तस्मै
सा भारती विजयतां सुचिरं धरण्याम् ॥ १ ॥

नो कालिदासपदवीमनुधावतीयं
वाणी ममेति कवितां न परित्यजामि ।
नासौ पुरन्दरपुरीगणिकोपमेति
को वा जहाति दयितां परिणीय लोके ॥ २ ॥

कर्णामृतत्वमुपयाति निशम्यमाना
वाणीव या मृगदृशामनुभूयमाना ।
तृष्णां च वर्धयति वक्त्रसुधेव तासां
तामामव(न)न्ति कवितां रसिकावतंसाः ॥ ३ ॥

काठिन्यजन्मसदनं न सदा शिलेव
तूलस्य राशिरिव नापि सुखेन भेद्या ।
अन्तर्निगुम्भितरसा कठिनापि मृद्वी
या कामिनीस्तनतटीव हि सैव वाणी ॥ ४ ॥

---

*अडयार् कोशागारात्-मातृका xxxix H 22, (सूची ५ संख्या ४५६). आधुनिकस्य कवेरस्य वृत्तान्तो न ज्ञायते। अस्यैव अन्या लघुकृतयस्तत्रैव अडयार्कोशागारे वर्तन्ते याः क्रमशः प्रकाशयिष्यन्ते ॥ समनन्तरप्रकाशिता तस्य मनोगर्हणाख्या कृतिरपि अस्यामेव मातृकायां वर्तते (अडयार्-सूची ५.५८७)

कान्ता यथा हृदयहारिणमेव कान्तं
वाणी स्वयं कवयितारमसौ वृणीते ।
कृष्टा बलाद्यदि भवेन्न कदापि तेन
भुङ्क्तेऽखिलानपि यथारसमात्मभोगान् ॥ ५ ॥

दुःखानि चाप्ततमबन्धुवियोगजानि
वाक्यैः सुधारसमयैः परिमार्ष्टि कान्ता ।
तस्या वियोगजनितानि (च) दुःसहानि
दूरीकरोतु नितरां कवितावधूटी[1] ॥ ६ ॥

मन्दानिलेन शिशिरेण हि वीज्यमाना
बालारुणस्य किरणैः परिचुम्बयमाना ।
वाणी पतत्रिनिचयैरपि गीयमाना
डोलाविहारमयते हृदये कवीनाम् ॥ ७ ॥

जिह्वाङ्गणेष्नृतमेव सदा कवीनां
नृत्यं समाकलयतीति हि ये भणन्ति ।
कुर्वन्तु ते ननु निजामचिरेण जिह्वां
जह्नूद्भवासलिलसंगमतः पवित्राम् ॥ ८ ॥

गीतेन मञ्जुमुरलीमुखसंभवेन
चित्रेण भावपरिगुम्भनबन्धुरेण ।
माध्वीरसेन कवनेन च दीयमान-
मानन्दसारमवगच्छति तद्रसज्ञः ॥ ९ ॥

ये केचिदर्थगुरुतामविचिन्त्य वाचां
प्रासैकदत्तधिषणाः कवयो लिखन्ति ।

---

१. इतराप्त-जनवियोगदुःखानि निजकान्ता परिमार्ष्टि । तत्कान्तावियोगदुःखानि कविता परिमार्ष्टि ।

तेषां कृती रसिकरञ्जकतां न याति
भूषाञ्चिता विवसना हरिणेक्षणेव ॥ १० ॥

स्यात्सन्ततं कवयितुर्यदि सिच्यमाना
वाणी रसैरघरितामरलोकपानैः ।
प्रासैर्विनापि हृदयंगमतामुपैति
नारोपितं गुणमभीत्सति रम्यता हि ॥ ११ ॥

आराममन्दमरुताभिगतश्च सौधः
पूर्णेन शीतरुचिना रुचिरा त्रियामा ।
माधुर्यगर्भकविता रसिका च कान्ता
येषां भवन्ति पुरुषा ननु ते हि धन्याः ॥ १२ ॥

ये केचिदत्र कवयः शतशः पदानां
विच्छेदनेन परितोषमवाप्नुवन्ति ।
एते सरस्वति सरोरुहकोमलानि
कृन्तन्ति निष्करुणमेव तवाङ्गकानि ॥ १३ ॥

का त्वं मृगाक्षि, वचसामधिदेवताहं
मातश्चिराय रुदती ननु कुत्र यासि ।
भोजादिमाश्रयलयात् दिवमुत्पतामि
मामैवमम्ब, कथमत्र हि मादृशानाम् ॥ १४ ॥

बालेन भारति मया मितदृष्टिनापि
पादाम्बुजे तव मदम्ब समर्पितैषा ।
कारुण्यवारिनिधिवीचिभिराहता ते
जीयाच्चिरं जगति मे कविकण्ठभूषा ॥ १५ ॥

॥ इति कृष्णकविविरचितं कविकण्ठाभरणं समाप्तम् ॥

॥ मनोगर्हणम् ॥

॥ श्रीकृष्णकविविरचितम् ॥

कृच्छ्रेणेयमुपार्जिता सुमनसां विद्यानवद्याप्यसौ
वाणी चाधिगता कवीन्द्रहृदयानन्दैकसन्दायिनी ।
संगीतादिषु च प्रवृत्तिरनघेष्वासादिता केषुचित्
जानीमो न वयं कदा खलु मनो जायेत ते निर्वृतिः ॥ १ ॥

शास्त्रं सम्यगधीतमत्र भवता पञ्चेषुणोदीरितं
प्रासस्तत्परिशीलनाय सुचिरं वासश्च योषान्तिके ।
तत्पादाब्जतलाहतिप्रभृतयो मोदाय च प्राभवन्
जानीमो न वयं कदा खलु मनो निर्वृत्ततामेष्यसि ॥ २ ॥

निर्लज्जं कवितासतीमुपनतां विक्रीय भूमीभुजा-
मास्थानेष्वितरत्र चापि नितरामालंब्य सेवादिकम् ।
वाणिज्यं प्रतिपद्य किंचिदपि चोपात्तं यथार्हं धनं
जानीमो न वयं कदा खलु मनो निर्वृत्ततामेष्यसि ॥ ३ ॥

पुंनाम्नो नरकात् पितॄनिह मम त्रातेति पुत्रोऽप्यसौ
यागाद्यैरपि कर्मभिः कथमपि प्राप्तश्चिरात्पावनैः ।
यातः संसृतिधूर्वहत्वमपि च श्रान्तं नितान्तं वपुः
जानीमो न वयं कदा खलु मनो निर्वृत्ततामेष्यसि ॥ ४ ॥

युक्तं ते प्रबलेषु तेषु सुचिरं पञ्चेन्द्रियेष्वग्रतः
प्रस्थानं रथिनो बलादनुपसंहार्येषु वाजिष्विव ।
विश्रान्तिं गतवन्ति तानि तु भवन्मित्राणि किं वा वृथा-
धावस्तत्र धरातले न हि मनो जायेत ते निर्वृतिः ॥ ५ ॥

॥ इति कृष्णकविकृतं मनोगर्हणम् ॥

॥ प्रास्ताविकश्लोकाः ॥

॥ श्रीकृष्णकविविरचिताः ॥

अल्पोऽपि बलवानेव संपर्केण महीयसः ।
जामातुरवलंबेन तत्सखा बहु मन्यते ॥ १ ॥

शुद्धोऽपि सङ्गाद् रागादीन् विकारानश्नुते जनः ।
त्रिकोणदर्पणावेशान्मयूख इव भास्वतः ॥ २ ॥

स मूढो यस्तु मनुते भार्या मम वशंवदा ।
सा मूढा या च मनुते भर्ता मय्येव रज्यति ॥ ३ ॥

शयनादियं प्रिया मे
कथमप्युत्थाय मन्दमुपयान्ती ।
क्लिन्ना लसति कृशाङ्गी
मधुकरभुक्तेव मालतीलतिका ॥ ४ ॥

कलङ्कवत्त्वान्मृगलाञ्छनोऽसौ
तापाकरत्वादपि तिग्मभानुः ।
सावर्ण्यमेत्याप्यधुना लभेते
नैवोपमामस्मदधीशकीर्तेः ॥ ५ ॥

तरङ्गहस्तानयमम्भसां निधिः
प्रसार्य नो घोषमिषेण याचते ।
शनैर्मृगाङ्कोऽप्युदयन्निहौदना-
न्यसौ करैः संस्पृशतीव संकुचन् ॥ ६ ॥

ईषद्भुग्नकटीगतार्भकपरीरम्भच्छलात् पाणिना
सव्येन स्तनमण्डलीगतमियं किंचिन्निरस्यांशुकम् ।

---

१. प्रयच्छतीत्यर्थः ।

अन्येनापि वितर्दिसंगतभरेणापांगसंचारिणा
पार्श्वस्थं स्वजनं प्रतार्य तरुणान् साचि स्मितं वीक्षते ॥ ७ ॥

दंपत्योर्बहुपातकं किमु भवेदन्योन्यमालोकनाद्
यद् भर्त्रा मुहुरर्थितापि हि दिवा नैव प्रिया दृश्यते ।
किं चैषा विरचय्य सद्मनि पुनः कृत्यानि सर्वाण्यहो
भर्तारं समुपैति भीतनयना निर्वाप्य दीपं निशि ॥ ८ ॥

कर्णानन्दकरोऽस्य नैव निनदो नो वा गरुत्मानसौ
प्राप्नोत्येव हि कोकिलेन तुलनामाकारतः केवलम् ।
इत्थं काक विनिन्दितोऽपि सकलैर्दूनो भवान्मा स भूत्
श्लाघ्यं ते चरितं नु बन्धुरहितो नाश्नाति किंचिद्यतः ॥ ९ ॥

वेगादुच्चलता सनीरशिशुना धूतोत्तरीयाञ्चला
मुग्धा विश्लथबन्धनैस्तत इतः कीर्णैरियं मूर्धजैः ।
पाणिभ्यामवलंब्य शृङ्खलयुगीमुद्धृत्य बाहाद्वयं
पश्चात् किंचिदिवानता विहरते दोलाधिरूढा सती ॥ १० ॥

वसनान्तरचारु दृश्यमानौ कुचकुम्भौ तव तप्तहेमवर्णौ ।
हृदये मम संगतौ सुमेषोरभिषिक्ताविव यौवराज्यसीम्नि ॥ ११ ॥

अनुरञ्जित एष केशपाशस्तव मुग्धाक्षि सुगन्धतैलसेकात् ।
हरतीह मनांसि हन्त यूनामपि बद्धः पुरतो मुखाम्बुजस्य ॥ १२ ॥

परिचुम्बति सौरभैकलोभात्
पुरतोऽभ्येत्य निराकृतोऽपि पश्चात् ।
तव वक्त्रमचेतनोऽपि केशः
तरुणाः कामिनि किं न कुर्युरत्र ॥ १३ ॥

॥ इति कृष्णकविकृताः प्रास्ताविकश्लोकाः ॥

॥ सुभाषितसुधानन्दलहरी ॥*

सुभाषितसुधानन्दलहरी यदि लभ्यते ।
अलं हारैः किमाहारैर्विहारैरपि योषिताम् ॥ १ ॥

सुभाषितेन गीतेन युवतीनां च लीलया ।
यस्य न द्रवते चित्तं स वै मूढोऽथवा पशुः[1] ॥ २ ॥

सुजनं व्यजनं मन्ये महावंशसमुद्भवम् ।
स्वपरिभ्रमणेनैव तापं हरति देहिनाम्[2] ॥ ३ ॥

यद्यप्युपद्रवशतैरुपहन्यमाना-
स्सन्तस्सदा व्यपनयन्ति परस्य खेदम्[3] ।
चन्द्रो विधुन्तुदमुखग्रसितैकपार्श्वः
पार्श्वान्तरेण जगदार्तिमपाकरोति[4] ॥ ४ ॥

चन्द्रः क्षयी प्रकृतिवक्रतनुः कलङ्की
दोषाकरस्स्फुरति मित्रविपत्तिकाले ।
चन्द्रस्तथापि शिरसा ध्रियते शिवेन
नैवाश्रितेषु महतां गुणदोषचिन्ता ॥ ५ ॥

महतां सङ्गमात्सद्यो याति निन्द्योऽपि वन्द्यताम् ।
प्रविश्य गङ्गां रथ्याम्बु त्रिदशैरपि सेव्यते ॥ ६ ॥

---

*मद्रपुरीशासकीयहस्तलिखितकोशागारस्थे D. 12136, 12137 इत्यङ्किते मातृके आलम्ब्य मुद्रितमिदम् । पाठभेदाश्चात्र M_1 M_2 इति संकेतेन दत्ताः ; M_2स्थाः अधिकाः श्लोका अन्ते दत्ताः ; M_2 मातृकायां मध्ये मध्ये ग्रन्थपांता दृश्यन्ते ॥

१. अत्र त्रयः श्लोका अधिका M_2 मातृकायाम् २. M_2 °णादेव परतापं व्यपोहति । इतः परमेकः श्लोकोऽधिकः । ३. M_2 दुःखम् । ४. M_2 अष्टमः श्लोकः ।

चतुरङ्गुलमात्रेण चक्षुःकर्णौ न पश्यति ।
यो यस्य हृदये नास्ति समीपस्थोऽपि दूरवत् ॥ ७ ॥

हंसोऽध्वगश्रममपोहयितुं वनान्ते
कारण्डकाकबककङ्ककुलं प्रविष्टः ।
मूकोऽयमित्यपहसन्ति लुनन्ति पक्षान्
हीनाश्रयोऽपि महतामवमानहेतुः ॥ ८ ॥

परित्यक्तापि कस्तूरी पामरैः पङ्कशङ्कया ।
अलं खेदेन भूपालाः किं न सन्ति महीतले ॥ ९ ॥

हेम्नः खेदो न दाहेन च्छेदेन निकषेण वा ।
इदमेव महद्दुःखं यद्गुञ्जासमतोलनम् ॥ १० ॥

गुणैरुत्तुङ्गतां याति न तु सिंहासनादिभिः ।
प्रासादशिखरस्थोऽपि काकः किं गरुडायते ॥ ११ ॥

यदि सन्ति गुणाः पुंसां विकसन्त्येव ते स्वयम् ।
न हि कस्तूरिकामोदश्शपथेन निवार्यते[1] ॥ १२ ॥

अल्पीयसामेव निवासभूमे-
स्त्यागाद्विपत्तिः, महतां तु सम्पत् ।
स्थानादपेता मणयो लभन्ते
राज्ञां शिरः, काकमुखानि भेकाः ॥ १३ ॥

ग्रावाणो मणयो, हरिर्जलचरो, लक्ष्मीः पयोमानुषी,
मुक्तौघास्सिकताः, प्रवाललतिकाश्शैवालमम्भस्सुधा ।
तीरे कल्पमहीरुहप्रभृतयो पा(व्या)वर्णयन्त्यम्बुधिं
दूरे कर्णरसायनं निकटतस्तृष्णापि नो शाम्यति[2] ॥ १४ ॥

---

१. M2 विभाव्यते। २. भल्लटशतकस्थोऽयं श्लोकः; तत्र तृतीयपादापरभागे 'नाम्नापि रत्नाकरः' इति समीचीनः पाठः।

छायामन्यस्य कुर्वन्ति स्वयं तिष्ठन्ति चातपे ।
फलन्ति चापरार्थाय नात्महेतोर्महाद्रुमाः ॥ १५ ॥

यत्र विद्यागमो नास्ति यत्र नास्ति धनागमः ।
यत्र चात्मसुखं नास्ति न तत्र दिवसं वसेत् ॥ १६ ॥

त्यजेदवृत्तिकं देशं वृत्तिं सोपद्रवां त्यजेत् ।
त्यजेत्कृपणराजानं मित्रं मायाविनं त्यजेत् ॥ १७ ॥

गीते वाद्ये तथा नृत्ते सङ्ग्रामे सुरतेऽपि च ।
आहारे च विहारे च[1] त्यक्तलज्जः सुखी भवेत् ॥ १८ ॥

उत्कोचं प्रीतिदानं च द्यूतद्रव्यं सुभाषितम् ।
चोरद्रव्यविभागं च सद्यो गृह्णाति बुद्धिमान् ॥ १९ ॥

शाठ्येन मित्रं कलुषेण धर्मं
परोपतापेन समृद्धिभावम् ।
सुखेन विद्यां परुषेण नारीं
वाञ्छन्ति ये नूनमपण्डितास्ते ॥ २० ॥

चिन्तनीया हि विपदामादावेव प्रतिक्रिया ।
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे ॥ २१ ॥

यज्ञोऽनृतेन क्षरति तपः क्षरति विस्मयात् ।
आयुर्विप्रापवादेन दानं तु परिकीर्तनात् ॥ २२ ॥

यदीच्छसि वशीकर्तुं जगदेकेन कर्मणा ।
परापवादसस्येभ्यो गाश्चरन्तीर्निवारय ॥ २३ ॥

अलसस्य कुतो विद्या अविद्यस्य कुतो धनम् ।
अधनस्य कुतो बन्धुरबन्धोश्च कुतो बलम् ॥ २४ ॥

---

१. अन्यत्र पाठान्तरं 'व्यवहारे च'।

पुस्तकेषु च या विद्या परहस्तेषु यद्धनम् ।
देशान्तरगतः पुत्रस्त्रीण्येतानि वृथा वृथा ॥ २५ ॥

लालनाद्बहवो दोषास्ताडनाद्बहवो गुणाः ।
तस्मात्पुत्रं च शिष्यं च ताडयेन्न तु लालयेत् ॥ २६ ॥

तत्त्वज्ञस्य तृणं शास्त्रं शूरस्य मरणं तृणम् ।
विरक्तस्य तृणं नारी निस्पृहस्य तृणं जगत् ॥ २७ ॥

ऐश्वर्यस्य च भूषणं सुजनता[1] शूरस्य वाचं(चां) यमो
ज्ञानस्योपशमः श्रुतस्य विनयश्चार्थस्य पात्रे व्ययः ।
अक्रोधस्तपसः क्षमा बलवतो धर्मस्य निर्व्याजता
शीलं तु प्रमदाजनस्य वचसां सत्यं परं भूषणम्[2] ॥ २८ ॥

सुखार्थी चेत्त्यजेद्विद्यां विद्यार्थी चेत्त्यजेत्सुखम् ।
सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनस्सुखम् ॥ २९ ॥

नातिनीचैर्न चात्युच्चैर्भवितव्यं फलार्थिना ।
किञ्चिन्नत्वा पिबन्नम्भः फलमाप्नोति पूर्णकम्[3] ॥ ३० ॥

अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनां चावमानं च मतिमान्न प्रकाशयेत् ॥ ३१ ॥

आर्युर्वित्तं गृहच्छिद्रं मन्त्रमौषधसङ्गमौ ।
दानं मानावमानौ च नव गोप्यानि कारयेत् ॥ ३२ ॥

सदा मुखस्थिता विद्या प्रस्तावस्फुरिता यदि ।
कामधेनुरिव स्वर्गे भुवि सर्वफलप्रदा ॥ ३३ ॥

---

१. मातृकायां विधिरतः । २. भर्तृहरि - नीति° ८१

३. 'स्तोकं नत्वा पिबन्नम्भः कुम्भः प्राप्नोति पूर्णताम् ' इति सूक्तिमुक्तावली ।

चिन्तायाश्च चितायाश्च बिन्दुमात्रं विशिष्यते ।
चिता दहति निर्जीवं चिन्ता जीवन्तमप्यहो ॥ ३४ ॥

अर्कः स्वकरसंपर्कादपोहति बहिस्तमः ।
सन्तस्तु दर्शनादेव बहिरन्तर्दिवानिशम् ॥ ३५ ॥

यावदर्ककरस्पर्शः तावदेव तमःक्षयः ।
सकृदेव सतां सङ्गः शश्वत्सर्वतमोपहः ॥ ३६ ॥

अधमा धनमिच्छन्ति धनमानौ हि मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥ ३७ ॥

यस्मिन् जीवति जीवन्ति बहवस्स तु जीवति ।
बकोऽपि किं न कुरुते चञ्च्वा स्वोदरपूरणम् ॥ ३८ ॥

लुब्धस्य च दरिद्रस्य द्वयोर्लोकद्वयं हतम् ।
दानाभावाद्दरिद्रस्य लुब्धस्यानुपकारतः ॥ ३९ ॥

येन संबन्धमन्विच्छेत् तेन त्रीणि न कारयेत् ।
विवादमर्थसंबन्धं परोक्षे दारभाषणम् ॥ ४० ॥

नाक्षराणि पठता किमपाठि विस्तृतः किमथवा पठितोऽपि ।
इत्थमर्थिजनसंशयडोलाखेलनं खलु चकार नकारः[1] ॥ ४१ ॥

शिक्षन्ते न हि याचन्ते देहि देहीति याचकाः ।
अदत्वा मादृशो मा भूर्दत्वा त्वत्सदृशो भव ॥ ४२ ॥

उत्तुङ्गमम्भोजसमानपुष्पं बृहत्फलं शाल्मलिवृक्षमेकम् ।
शुकस्समाश्रित्य विपाककाले [2]तूलं गतं वीक्ष्य गतो निराशः ॥ ४३ ॥

---

१. नैषधीये ५.१२१ तत्र 'विस्मृत' इति द्वितीयपादादौ पाठभेदः ।
२. तूलं निर्गतमित्यर्थः ; अथवा 'तूलीकृतम्' इति स्यात्पाठः ।

नास्ति विद्यासमं मित्रं नास्ति [1]द्रव्यसमो रिपुः ।
न च द्रव्य(चापत्य)समः स्नेहो न च दैवात्परं बलम् ॥ ४४ ॥

सतां धनं साधुभिरेव भुज्यते दुरात्मभिर्दुश्चरितात्मनां धनम् ।
शुकादिभिश्चूतफलं तु भुज्यते भवन्ति निम्बाः खलु काकभक्षकाः ॥४५॥

कपिरपि च कापिशायनमदमत्तो वृश्चिकेन सन्दष्टः ।
अपि च पिशाचग्रस्तः किं ब्रूमो वैकृतं तस्य ॥ ४६ ॥

महत्स्वधिगताशेषकल्याणगुणराशिषु ।
मदुक्तिवादोऽयस्कारवाटिकासूचिविक्रियः ॥ ४७ ॥

नक्रस्स्वस्थानमासाद्य गजेन्द्रमपि कर्षति ।
स एव प्रच्युतः स्थानाच्छुनापि परिभूयते ॥ ४८ ॥

उचितव्ययशीलस्य कृशत्वमपि शोभते ।
द्वितीयश्चन्द्रमा वन्द्यो न वन्द्यः पूर्णचन्द्रमाः ॥ ४९ ॥

वाणी दरिद्रस्य सुभाषितापि शब्देन चार्थेन च सङ्गतापि ।
न शोभते वित्तवतस्समीपे भेरीनिनादोपहतेव वीणा ॥ ५० ॥

स्वादु चूतरसं पीत्वा गर्वं नायाति कोकिलः ।
पीत्वा कर्दमपानीयं भेकः पकपकायते ॥ ५१ ॥

दोषागमनमालक्ष्य रविरेष तिरोहितः ।
तस्यामेवेन्दुरायाति न हि शङ्का कलङ्किनः ॥ ५२ ॥

निर्वीर्याणां क्षत्रियाणां प्रतापो
निर्विद्यानां ब्राह्मणानां गुरुत्वम् ।
नीरूपाणां कामिनीनां विलासो
हासारम्भं कस्य वा नो विधत्ते ॥ ५३ ॥

---

1. व्याधि° इत्यन्यत्र कोशेषु ।

नूनं जनेन पुरुषे महति प्रयुक्त-
भागः परं तदनुरूपफलं प्रसूते ।
कृत्वा रघूद्वहकृते क्षणमन्तरायं
यद्भार्गवः परगतेर्विहतिं प्रपेदे ॥ ५४ ॥

कस्तूरिकां तृणभुजामटवीमृगाणां
निक्षिप्य नाभिषु चकार वृथा वधार्हान् ।
मूढो विधिस्सकलदुर्जनलोलजिह्वा-
मूलेषु निक्षिपति चेत्सकलोपकारः[1] ॥ ५५ ॥

गम्यते यदि मृगेन्द्रमन्दिरं
लभ्यते द्विरददन्तमौक्तिकम् ।
जम्बुकालयगतेन लभ्यते
वत्सपुच्छवरचर्ममण्डनम् ॥ ५६ ॥

नीचं नमन्ति नियमेन मृषा वदन्ति
पारं तरन्ति पयसां दिवमुत्पतन्ति ।
भारं वहन्ति धनिनां वशगा भवन्ति
प्रादेशमात्रपरिपूरणपारदृश्वाः (!) ॥ ५७ ॥

ऋणशोधनाय बहुशो महीपतीन्
क्षणशोऽनुवृत्य कणशो यदार्जितम् ।
अंशादिहैव तदनाशरिक्ततां
वद राजसिंह सदना च किन्न ये(?) ॥ ५८ ॥

यदमी दशन्ति दशनाः रसना तत्स्वादु सौख्यमनुभवति ।
प्रकृतिरियं विमलानां क्लिश्यन्ति यदन्यकार्येषु ॥ ५९ ॥

---

१. कृतः स्याद्विधिनेति वाक्यशेषः ।

विषकण्टकतोऽहिदन्ताद् वृश्चिकपुच्छाच्च सारमादाय ।
रचिता दुर्जनजिह्वा (पर)दुःखायैव निश्चयं[1] विधिना ॥ ६० ॥

याचमानजनमानसवृत्तेः पूरणाय बत जन्म न यस्य ।
तेन भूमिरतिभारवतीयं न द्रुमैर्न गिरिभिर्न समुद्रैः[2] ॥ ६१ ॥

भार्यावियोगस्स्वजनाभिमानं (वमानः)[3] ऋणस्य शेषं कुलहीन[4]सेवा ।
दारिद्र्यकाले प्रियदर्शनं च विनाग्निना पञ्च दहन्ति कायम् ॥ ६२ ॥

सूते सूकरयुवती सुतशतमत्यन्तदुर्भगं झटिति ।
करिणी चिराय सूते सकलमहीपाललालितं कलभम् ॥ ६३ ॥

ऋणशेषोऽग्निशेषश्च शत्रुशेषस्तथैव च ।
पुनः पुनर्विवर्धन्ते तस्माच्छेषं न कारयेत् ॥ ६४ ॥

ददाति प्रतिगृह्णाति कार्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं मित्रलक्षणम् ॥ ६५ ॥

सुधास्वादनवेलायां बहवः सन्ति देवताः ।
कालकूटे समायाते स शेषश्शेषभूषणः ॥ ६६ ॥

गुणवन्तं समासाद्य निर्गुणोऽपि गुणी भवेत् ।
मेरुपर्वतमासाद्य काकोऽपि कनकायते ॥ ६७ ॥

महता स्पर्द्धमानस्य विपत्तिरपि शोभते ।
दन्तभङ्गोऽपि नागानां परं गिरिविदारणे ॥ ६८ ॥

कृपणस्य (हि) धनमफलं यौवनमफलं दरिद्रस्य ।
अशनं साक्षिक[5]मफलं श्रुतमफलं दुर्विनीतस्य ॥ ६९ ॥

---

१ निश्चयेनेत्यर्थः २ नैषधीय° ५.५८.
३ स्वजनापवाद इत्यन्यत्र ४ कुजनस्य इत्यन्यत्र.
५. असहभोजिषु अन्येषु पश्यत्सु इत्यर्थः ।

यथा गजः परिश्रान्तः छायामाश्रित्य विश्रमेत् ।
विश्राम्य तं द्रुमं हन्यात् तथा नीचस्त्वमाश्रयम् ॥ ७० ॥

न विना परिवादेन रमते दुर्जनो जनः ।
श्वा हि सर्वरसान् पीत्वा विनाऽमेध्यं न तुष्यति ॥ ७१ ॥

शुनां च पिशुनानां च प्रतिवेश्मप्रवेशने[1] ।
प्रयोजनं न पश्यामः पात्राणां दूषणादृते ॥ ७२ ॥

पात्रमपात्रीकुरुते दहति गुणान् स्नेहमाशु नाशयति ।
मलिनीकरोति विमलं दीपज्ज्वालेव भवति खलमैत्री ॥ ७३ ॥

अनर्घमपि माणिक्यं हेमाश्रयमपेक्ष्यते ।
निराश्रया न शोभन्ते पण्डिता वनिता लताः ॥ ७४ ॥

चोराः काननसीम्नि दुष्टगणिका देवालये वा पुरे
क्षुद्राः क्षोणिभृतो विवेकरहिताः सिंहासने केचन ।
ग्रामण्यः परदारवित्तरसिका ग्रामेषु हाहा जगत्
[2]जातं शीतमयूखशेखर सतां वासः क्व वा कल्प्यताम् ॥ ७५ ॥

कान्तं प्राह कपोतिकाकुलतया नाथान्त्यकालोऽधुना
व्याधोऽयं[3] धृतचापसंहितशरः श्येनः[4] परिभ्राम्यति ।
एवं सत्यहिना स दष्ट इषुणा श्येनोऽपि तेनाहतः
तूर्णं तौ तु यमालयं प्रति गतौ दैवी विचित्रा गतिः ॥ ७६ ॥

वृत्तिच्छेदविधौ कलत्रहरणे स्वामिग्रहे गोग्रहे
साधूनां व्यसने द्विजातिमरणे मित्रापदां वारणे ।
ये शक्ताः पुरुषाः पराङ्मुखतया कुर्वन्युदासीनतां
तानालोक्य निरीक्षितुं मृगयते सूर्योऽपि सूर्यान्तरम् ॥ ७७ ॥

---

१. प्रवेशिनाम् इत्यन्यत्र । २. एवं संभूतमित्यर्थः ।
३. 'यो' इति मातृकायाम् । ४. 'ज्योत्स्ना' इति मातृकायाम् ।

न कदाचिद्विनिर्यान्ति[1] मानिनां प्रार्थनागिरः[2] ।
यदि निर्यातुमिच्छन्ति तदा प्राणपुरस्सरम्(राः)[3] ॥ ७८ ॥

दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता ।
अभ्यासेन तु लभ्यन्ते चत्वारस्सहजा गुणाः ॥ ७९ ॥

तृणाल्लघुतरस्तूलस्तूलादपि च याचकः ।
वायुना किन्न नीतोऽसौ मामयं प्रार्थयेदिति ॥ ८० ॥

गतिर्मन्दस्स्वरो हीनो गात्रकम्पो महद्भयम् ।
मरणे यानि चिह्नानि तानि चिह्नानि याचके ॥ ८१ ॥

द्वारं द्वारमटन्त्येते भिक्षुकाः पात्रपाणयः ।
दर्शयन्तीव लोकानामदातुः फलमीदृशम् ॥ ८२ ॥

दृष्टे वनीपकजने वदनं स्मितेन
दानाम्बुना करतलं यशसा दिशश्च ।
शुभ्रीकरोति विशवस्स्वयमेव दाता
कस्तादृशं प्रतिनिवर्तयितुं क्षमेत ॥ ८३ ॥

आपत्सु वैराणि समुद्भवन्ति
च्छिद्रेष्वनर्था बहुलीभवन्ति ।
व्रणे प्रहाराणि पतन्त्यजस्रं
धनक्षये दीव्यति जाठराग्निः ॥ ८४ ॥

स्याद्राजा यदि सुन्दरो.....निर्गुणः
स्याच्चेत् पूर्णगुणो बलेन रहितः स्याच्चेद्बली कातरः ।

१, बहिर्यान्ति इत्यन्यत्र ।
२. मातृकायामबद्धमत्र ।
३. सूक्तिरत्नहारे दृश्यते पृ. १२६ (T.S.S.)

शूरश्चेद्विनयान्वितस्स(तो न)विनयस्स्यात् (यी स्यात्) चेन्न दानोत्सुकः
स्याद्दाता यदि पात्रदानविमुखस्त्वय्येव सर्वे गुणाः ॥ ८५ ॥

लुब्धो न विसृजत्यर्थान् नरो दारिद्र्यशंकया ।
दातापि वितरत्यर्थान् तथैव न तु शङ्कया ॥ ८६ ॥

उदेति सविता रक्तो रक्त एवास्तमेति च ।
संपत्तौ च विपत्तौ च महतामेकरूपता ॥ ८७ ॥

सत्पात्रदानेन भवेद्धनाढ्यो
धनप्रकर्षेण करोति पुण्यम् ।
पुण्यादवश्यं त्रिदिवं प्रयाति
पुनर्धनाढ्यः पुनरेव भोगः ॥ ८८ ॥

अदत्तदोषेण भवेद्दरिद्रो
दारिद्र्यदोषेण करोति पापम् ।
पापादवश्यं नरकं प्रयाति
पुनर्दरिद्रः पुनरेव पापी ॥ ८९ ॥

दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम् ।
त्यागान्वितं च वित्तं दुर्लभमेवं (तत्) चतुष्टयं लोके ॥ ९० ॥

वृथा वृष्टिस्समुद्रस्य[1] वृथा तृप्तस्य भोजनम् ।
वृथा धनपतेर्दानं त्रीण्येतानि वृथा वृथा ॥ ९१ ॥

अपहृत्य परस्यार्थान् यस्तु दानं प्रयच्छति ।
स दाता नरकं याति यस्यार्थस्तस्य तत्फलम् ॥ ९२ ॥

तावद्गुणा गुरुत्वं च यावन्नार्थयते परान् ।
अत्यर्थी चेत् पुमान्[2] जातः क्व गुणाः क्व च गौरवम् ॥ ९३ ॥

---

१. समुद्रे इत्यर्थः ।

२, पुक्को इति मातृकायाम् 'आर्थित्वे वर्तमानस्य' इति सुभाषितावलौ ।

असहायस्समर्थोऽपि तेजस्वी किं करिष्यति ।
निवातपतितो वह्निस्स्वयमेव प्रशाम्यति ॥ ९४ ॥

अविद्वान् पुरुषः पूर्वं पूजामाप्नोति किं ततः ।
पूर्वं प्रक्षालितः पादः आननादधिकः किमु ॥ ९५ ॥

दोषमेव तु गृह्णाति न गुणं विगुणो जनः ।
जलूकः स्तनसंसक्तो रक्तं पिबति नामृतम् ॥ ९६ ॥

अर्थेन किं कृपणहस्तगतेन पुंसां
ज्ञानेन किं बहुशठाकुलमत्सरेण ।
रूपेण किं बहुपराक्रमवर्जितेन
स्नेहेन किं व्यसनकालपराङ्मुखेन ॥ ९७ ॥

दुर्जनो दोषमादत्ते दुर्गन्धमिव सूकरः ।
सज्जनस्तु गुणग्राही हंसः क्षीरमिवाम्भसि ॥ ९८ ॥

सर्वेषां भुवि सन्तानां (सङ्गानां) सत्सङ्गो दुर्लभः खलु ।
सत्सङ्गादिष्टकाम्यानि सम्प्राप्नोति नरोत्तमः ॥ ९९ ॥

नमन्ति फलिता वृक्षा नमन्ति च बुधा जनाः ।
शुष्ककाष्ठाश्च मूर्खाश्च भिद्यन्ते न नमन्ति च ॥ १०० ॥

दन्तिदन्तोपमं वाक्यं महतां निर्गतं स्थिरम् ।
कूर्मग्रीवेव नीचानां निर्गच्छेत्प्रविशेत्पुनः ॥ १०१ ॥

परोऽपि हितवान् बन्धुः बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिः हितमारण्यमौषधम्[1] ॥ १०२ ॥

न विषं विषमित्याहुः ब्रह्मस्वं विषमुच्यते ।
विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम् ॥ १०३ ॥

---

१. अर्धमिदं लुप्तं मातृकायाम्, तत्स्थाने श्लोकान्तरस्यार्धं लिखितम् ।

खलानां कण्टकानां च द्विविधैव प्रतिक्रिया ।
उपानन्मुखभङ्गो वा दूरतो वा विसर्जनम् ॥ १०४ ॥

मृगमीनसज्जनानां तृणजलसन्तोषविहितवृत्तीनाम् ।
लुब्धकधीवरपिशुना निष्कारणमेव वैरिणो जगति ॥ १०५ ॥

अल्पप्रभुत्वसेवायां भुक्तमात्रं प्रयोजनम् ।
अनुग्रहेऽप्यजामूल्यं निग्रहे प्राणसङ्कटम् ॥ १०६ ॥

विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनादर्थं[1] ततस्सुखम् ॥ १०७ ॥

केशाः कज्जालकाशोभाः (?) शुभाकाराः पिनाकिनः ।
विवि(दिवि) गोयायिनो दद्युश्शमब्जांबुनगौकसः (?) ॥ १०८ ॥

अधिकारश्च गर्भश्च ऋणं च श्वानमैथुनम् ।
प्रवेशे सुखमाप्नोति निर्गमे प्राणसङ्कटम् ॥ १०९ ॥

महामहिम्नामपि यश्चिकीर्षति स्वभावसंशुद्धतरा रो यशः (?) ।
स एव सञ्छादयितुं प्रवर्तते विवस्वतो हस्ततलेन मण्डलम् ॥ ११० ॥

श्रोत्रियं संगगंगां[2] च ह्यग्निमग्निचितं तथा ।
प्रातरुत्थाय यः पश्येदापदस्स प्रमुच्यते ॥ १११ ॥

षापिष्ठं दुर्भगं मर्त्यं नग्नमुत्कृत्तनासिकम् ।
प्रातरुत्थाय यः पश्येत् तत्कलेरुपलक्षणम् ॥ ११२ ॥

बहूनामल्पसाराणां समवायो दुरत्ययः ।
तृणैराबद्ध्यते रज्जुः तया नागोऽपि बद्ध्यते ॥ ११३ ॥

बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु बलं कुतः ।
पश्य सिंहं मदोन्मत्तं शशकेन निपातितम् ॥ ११४ ॥

---

१. धनाद्धर्ममिति प्रसिद्धः पाठः ।
२. संगे संगमे या गङ्गा, प्रयागादिक्षेत्रेषु, ताम् ।

M₂मातृकायां दृष्टा अधिकाः श्लोकाः ।

दातृत्वं प्रियवक्तृत्वं धीरत्वमुचितज्ञता ।
अभ्यासेन न लभ्यन्ते चत्वारस्सहजा गुणाः ॥ ३ ॥

दाता न दापयति दापयिता न दत्ते
यो न दानदापनपरो मधुरं न वक्ति[1] ।
तद्दानदापनमनोरमभाषणानि
त्रीण्यप्यमूनि खलु सत्पुरुषे[2] वसन्ति ॥ ४ ॥

एते सत्पुरुषाः परार्थघटकाः स्वार्थान्[3] परित्यज्य ये
सामान्यास्तु परार्थमुद्यमभृतस्स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं स्वार्थाय निघ्नन्ति ये
ये निघ्नन्ति निरर्थकं परहितं ते के न जानीमहे[4] ॥ ५ ॥

सुजनो न याति वैरं परहितनिरतो विनाशकालेऽपि ।
छेदेऽपि चन्दनतरुः सुरभयति मुखं कुठारस्य ॥ ७ ॥

पद्माकरं दिनकरो विकचीकरोति
चन्द्रो विकासयति कैरवचक्रवालम् ।
नाभ्यर्थितो जलधरोऽपि जलं ददाति
सन्तस्स्वयं परहितेषु कृताभियोगाः[5] ॥ ९ ॥

भवन्ति नम्रास्तरवः फलोदये
नवाम्बुभिर्दूरविलम्बिनो घनाः ।

---

१. मातृकायां 'भवन्ति'; अशुद्धिबहुलेयं मातृका । २. षो ३. त्मान्
४. भर्तृहरि-नीति° ६४
५. भ. ह. नी. ६३

अनुद्धतास्सत्पुरुषास्समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्[६] ॥ १० ॥

पिबन्ति नद्यस्स्वयमेव नाम्भः
खादन्ति न स्वादुफलानि वृक्षाः ।
पयोधरो न क्वचिदत्ति सस्यं
परोपकाराय सतां विभूतिः ॥ ११ ॥

निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चण्डालवेश्मनि ॥ १३ ॥

अद्यापि नोज्झति हरः किल कालकूटं
कूर्मो बिभर्ति धरणीं खलु पृष्ठभागे ।
अम्भोनिधिर्वहति दुस्सहबाडवाग्निम्
अङ्गीकृतं सुकृतिनः परिपालयन्ति ॥ १४ ॥

अपेक्षन्ते न च स्नेहं न पात्रं न दशान्तरम् ।
सदा लोकहिते रक्ता रत्नदीपा इवोत्तमाः ॥ १५ ॥

रक्तत्वं कमलानां सत्पुरुषाणां परोपकारित्वम् ।
असतां च निर्भयत्वं[७] स्वभावसिद्धं त्रिषु त्रितयम् ॥ १६ ॥

विपदि धैर्यमथाभ्युदये क्षमा
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम्[८] ॥ १७ ॥

---

६. शाकुन्तले ५. १२.

७. निर्दयत्वमिति सुभाषितावलौ । ८. भ. ह. नी. ५२

सम्पत्सु महतां चित्तं भवत्यत्यन्तकोमलम् ।
आपत्सु च महाशैलशिलासंघातकर्कशम्[९] ॥ १८ ॥

परोपकारं सहजं जहाति
शेषश्च रोषं मलिनश्च पङ्कम् (?) ।
मा चञ्चल जनवियोगात (?)
सत्सङ्गतिः किं न करोति पुंसाम् ॥ १९ ॥

जाड्यं धियो हरति सिञ्चति वाचि सत्यं
मानोन्नतिं दिशति पापमपाकरोति ।
चेतः प्रसादयति दिक्षु तनोति कीर्तिं
सत्संगतिः कथय किं न करोति पुंसाम्[१०] ॥ २० ॥

[११]ये .... सज्जना सद्भिस्तु कदाचन (?) ॥ २७ ॥ ....

मित्रे निवेदिते दुःखे दुःखं (संजा)यते लघु [:] ।
भारं भारवहस्येव स्कन्धयोः परिवर्तने ॥ २८ ॥

गुणिनि गुणज्ञो रमते नागुणशीलस्य गुणिनि परितोषः ।
अलीरे (अलिरेति वनात्) कमलं न दर्दुरस्त्वेकवासोऽपि ॥ २९ ॥

वरं गृध्रो हंसैः सलिलपरितुष्टैः परिवृतो
न हंसः क्रव्यादैः पितृवनविहङ्गैर .... णो (भिवृतः ?) ।
परीवारः क्षुद्रो दहति गुणिनं चापि पुरुषं
सहायैरक्षुद्रैर्भवति गुणहीनोऽपि गुणवान् ॥ ३० ॥

---

९. भ. ह. नी. ५५; तत्र 'उत्पलकोमलम्' इति पाठः ।

१०. उत्तरार्धं लुप्तम्; भ. ह. नी. १९.

११. लुप्तप्राय एष श्लोकः । इतः पूर्वं ग्रन्थपातः ।

हंसो विभाति सरसीरुहवृन्दमध्ये
सिंहो विभाति हिमवद्गिरिकन्दरेषु ।
जात्यो विभाति तुरगो रणरङ्गमध्ये
विद्वान् विभाति पुरुषेषु विचक्षणेषु ॥ ३१ ॥

हंसो न भाति बलिभोजनवृन्दमध्ये
गोमायुमण्डलगतो न विभाति सिंहः ।
जात्यो न भाति तुरगः खरयूथमध्ये
विद्वान् (न) भाति पुरुषेषु निरक्षरेषु ॥ ३२ ॥

धिक् धिक् सज्जनमैत्रीं दुर्जनसंसर्ग एव नो (भवतु) ।
[12]सज्जनवियोगकाले भवन्ति तीव्राणि दुःखानि[13] ॥ ३३ ॥

..... ।
..... रतो वापि सज्जनम् ॥

आजन्मसिद्धं कौटिल्यं खलस्य च हलस्य च ।
(मु)खाक्षेपं तयोः सोढुमलमेकैव सा क्षमा[:] ॥[14]

खलानामलसा(का)नामुद्धृतानां मूर्ध्नि भीरुहि(भिः) ।
उपर्युपरि सत्काराद् भूयो भवति व(क्रता)[15] ॥

खलः सर्षपमात्राणि परदोषाणि (च्छिद्राणि) पश्यति ।
आत्मनो मेरुमात्राणि पश्यन्नपि न पश्यति ॥

---

१२. अत्र ग्रन्थपातः ।

१३. सूक्तिरत्नहारे ३६. २.

१४. सु. र. भा. ५४. २१.

१५. कविराक्षसीये मद्रास्-कोशे (D.1 2001) ५५. ग्रन्थलिपि-संस्करणे पाठभेदेन ७

जीवनग्रहणे नम्रा गृहीत्वा पुनरुत्थिताः[१६] ।
किं कनिष्ठाः किमु ज्येष्ठा घटीयन्त्रस्य दुर्जनाः ॥

कुरु(र्वं)ते स्वमुखेनैव बहुधान्यस्य खण्डनम् ।
(नमः प)तनशीलाय खलाय मुसलाय च[१७] ॥

वसन्नप्यवदातानां द्विजा(नां पुरतः?) सदा ।
रागानुबन्धमधरः कदापि न विमुञ्चति ॥

नित्यमक्षिगतस्यापि दुर्ज(न)स्याञ्जनस्य च ।
त लक्षयितुमाकारः शक्यः स्वानुप्रवेशिनः[६] ॥ ५० ॥[१८]

प्रसह्य मणिमुद्धरेन्मकरवक्त्रदंष्ट्रान्तरात्
समुद्रमपि सन्तरेत्प्रचलदूर्मिमालाकुलम् ।
भुजङ्गमपि कोपितं शिरसि पुष्पवद्धारये-
न्न (तु) प्रतिनिविष्टमूर्खजनचित्तमाराधयेत्[१९] ॥ ५१ ॥

व्यालं सालमृणालतन्तुभिरसौ रोद्धुं समुज्जृम्भते
भेत्तुं वज्रमणिं शिरीषकुसुमप्रान्तेन सन्नह्यति ।
माधुर्यं मधुबिन्दुना रचयितुं क्षाराम्बुधेरीहते
[२०]नेतुं वाञ्छति यः सतां पथि खलान् सूक्तैः स्वयम्....ते
(सुधास्यन्दिभिः) ॥ ५२ ॥

[२१](शशी दिवसधूसरो गलितयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः ।)

---

१६. °रुन्नता इत्यन्यत्र ।
१७. क. रा. म. कोशे ९१ ; बहोर्धान्यस्य, बहुधा अन्यस्य इति द्विधाच्छेदः ।
१८. क. रा. प्र. लि. संस्करणम् १५. १९. भ. ह. नी. ३
२०. भ. ह. नी. ५. मूर्खान् यः प्रतिनेतुमिच्छति बलात् इति तत्र ।
२१. अत्र ग्रन्थपातः

प्रभुर्धनपरायणः सततदुर्गतः सज्जनो
नृपा(ङ्गण)गतः खलो मनसि सप्त शल्यानि मे[२२] ॥ ५९ ॥

विवृण्वती पुरस्तैक्ष्यं पृष्ठतः कुर्वती गुणम् ।
कर्णान्विद्धयति लोकस्य सूचीवत् सूचकस्य वा(क्)[२३] ॥ ६० ॥

अहो पिशुनसर्पस्य सर्पस्य महदन्तरम्[२४] ।
अन्यस्य दशति श्रोत्रमन्यः प्राणान् विमुञ्चति[२५] ॥ ६२ ॥

लोकानन्दन चन्दनद्रुम[२६] सखे नास्मिन् वने स्थीयतां
दुर्वंशैः परुषैरसारहृदयैराक्रान्तमेतद्वनम् ।
ते ह्यन्योन्यनिघर्षदावदहनज्वालावलीसंकुलाः
न स्वान्यान्येव कुलानि केवलमिदं सर्वं दहेयुर्वनम् [२७] ॥

हंसाः पद्मवनाशया बलिभुजो गृध्राश्च मांसाशया
पान्थाः पक्व[२८]फलाशया परभृतश्चूतप्रवालाशया ।
आमोदानु(भवा ?)शया मधुलिहस्त्वामागताः शाल्मले
तेष्वेकोऽपि च वाञ्छितं न लभते केयं तवास(भ्यु)न्नतिः[२९] ॥

[३०]एणश्रेणी शशक निवहश्शल्यकानां समूहः
केकीवृन्दः श्रयति वसतिं यत्र मे.....सुधा ॥(?)

---

२२. भ. ह. नी. ४५.
२३. मातृकात्राऽवद्धा ; त्रुटिबहुला च ; क. रा. ६० (ग्र. लि. सं.)
२४. अहो खलभुजङ्गस्य विपरीतो वधक्रमः इत्यन्यत्र
२५. अन्यः प्राणैर्वियुज्यते इत्यन्यत्र
२६. नन्दवनद्रुम इति मातृकायाम्
२७. लुप्तप्रायोऽयं पादः । कुवलयानन्दे उदाहृतोऽयं श्लोकः ॥
२८. स्वादु इत्यन्यत्र २९. पाठान्तरैः शा. पद्धतौ १०३८
३०. इतः पूर्वं ग्रन्थपातः ।

विशालं शाल्मल्या नयनसुभगं वीक्ष्य कुसुमं
शुकस्यासीद्बुद्धिः फलमपि भवेदस्य सदृशम्३१ ।
इति ध्यात्वोपास्ति(स्तं) फलमपि (च) दैवात् परिणतं
विपाके तूलोऽन्तस्सपदि मरुता सोऽप्यपहृतः३२ ॥ ७० ॥

धिग् धिक् गर्जितमम्भो(धेः?) (धिग्) धिक् [देव] ता(वा)राशितां (तवः?)।
पारे पारे (पद पदे ?) पथि श्रान्ताः पान्थाः पृच्छन्ति (वापि ?)काम् ॥

जानुदघ्नजलं वापी(प्यां) तृष्णाभङ्गकरं परम् ।
अङ्गा येनापि(?) न सागरे लवणाम्भसा ॥

तत्रापि गुल्मे सोऽयं धन्य कथय सुकृतिपादपो (?)
भ्रमलिह श्रियस्यास्यच्छाया योऽयमनुसरत्यातपात्तत्करीन्द्रः (?) ।

अस्त्यद्य क्षुद्रजन्तूनां निमज्जनसहायतः(ता) ।
वरशू(खरांशुः?)करभि(खिः?)न्नानां करिणां ननु दुर्लभः ॥

किमत्र चित्रं यत्सन्तः परानुग्रहतत्पराः ।
न हि स्वदेहशैत्याय जायन्ते चन्दनद्रुमाः ॥

अपि मुदमुपयान्तो वा(ग्)विलासैः स्वकीयैः
वर(पर)भणितिषु तृप्तिं यान्ति सन्तः कियन्तः ।
निजघनमकरन्दस्यन्दपूर्णालवालः
कलशसलिलसेकं नेहते किं रसालः३३ ॥

प्रत्यक्षे गुरवः स्तुत्याः परोक्षे मित्रबान्धवाः ।
कर्मान्ते दासभृत्यास्तु पुत्रो नैव मृते स्त्रियः ॥

---

३१. भवेत्तादृशमिति इत्यन्यत्र
३२. भल्लटशतके १०७
३३. शा. पद्धतौ १६४; मातृकायामुत्तरार्धं लुप्तम् ।

वैद्यं पानरतं नटं कुनृपतिं (कुपठिनं) स्वाध्यायहीनं द्विजं
युद्धे (योधं) कापुरुषं-हयं गतरयं मूर्खं परिव्राजकम् ।
राजानं च कुमन्त्रिभिः परिवृतं देशं च सोपद्रवं
भार्यां यौवनगर्वितां पररतां मुञ्चन्ति शीघ्रं बुधाः[३४] ॥

यशस्करे कर्मणि मित्रसंग्रहे
प्रियासु नारीष्वधनेषु बन्धुषु ।
क्रतौ विवाहे व्यसने रिपुक्षये
धनक्षयोऽष्टासु न गण्यते बुधैः[३५] ॥

यस्य (माता गृ)हे[३६] नास्ति भार्या चाप्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथारण्यं तथा गृहम् ॥

अनुचितकर्मारम्भः स्वजनविरोधो बलीयसा स्पर्द्धा ।
प्रमदाजनविश्वासो[३७] मृत्युसमा अमी हि चत्वारः ॥

मूर्खशिष्योपदेशेन दुष्टस्त्रीभरणेन च ।
द्विषतां संप्रसङ्गेन[३८] पण्डितोऽप्यवसीदति ॥

क्षुतस्खलितजृम्भासु निर्जीवः पुरुषो भवेत् ।
पुनः प्रतिष्ठा[३९]सिद्ध्यर्थं जीवधूल्य(?)ङ्गुलीस्वनाः[४०] ॥

चिन्तनीया हि विपदामादावेव प्रतिक्रिया ।
न कूपखननं युक्तं प्रदीप्ते वह्निना गृहे[४१] ॥

---

३४. पद्मरत्ने । ३५. शा. पद्धतौ १४०६
३६. अत्र अक्षराणि भ्रष्टानि । ३७. हितोपदेशे; मृत्युस्समीप इति मातृकायाम् ।
३८. संप्रयोगेण इत्यन्यत्र । सु. र. भा. १५५-९१
३९,४०. 'पृष्टा', 'स्वनैः' इति मातृकायाम्; दृश्यतां समयोचितपद्यमालिका (निर्णयसागर, १९३७) पृ. ६५. श्लो. २८. 'छिक्कापतनजृम्भासु जीवोत्तिष्ठाङ्गुलिध्वनिम्' इत्यादि ।
४१. शा. पद्धतौ १४४०

.... द्रष्टव्या राजवल्लभाः पुरुषाः ।
यद्यपि न भवेदर्थो भवति .... ॥ १०५ ॥

सन्तोषस्त्रिषु कर्तव्यः स्वस्त्रियां पुस्तके सुते[४१] ।
[४२]त्रिषु नैव च कर्तव्यो दाने चाध्ययने जपे ॥ १०६ ॥

आलस्येन[४३] हता विद्या आलापेन कुलाङ्गना ।
अल्पबीजं हतं क्षेत्रं गे.... .... घम् ॥
दायादाः पिशुनाश्चोराश्चा .... रः ।
आयं व्ययं च मध्यस्था व्ययमेव हि बान्धवाः ॥

पिपासा लव .... क्षतपन्नगकण्टकैः (?) ।
श्रमं प्रहारैर्मुञ्चन्ति यादृशां तादृशीं गत (?) ॥

* * *

नवे वयसि यः शान्तः[४४]स शान्त इति मे मतिः ।
धातुषु क्षीयमाणेषु शान्तिः कस्य न जायते ॥ १११ ॥

पुस्तकेषु च या विद्या परहस्तेषु यद्धनम् ।
कार्यक...वेलायां न सा विद्या न तद्धनम् ॥ ११२ ॥

यस्य यस्य हि यो भावः तेन तेन हितं नरम्[४५] ।
अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ॥ ११३ ॥

आचार्ये (नृप)तौ धूर्ते वेश्यायां तस्करेषु च ।
माया तत्र न कर्तव्या माया तैरेव निर्मिता ॥ ११४ ॥

अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत् ।
मृतप्रजां च दशमे सद्यस्त्वप्रियवादिनीम् ॥ ११५ ॥

---

४१. पुस्तकेषु ते। ४२. लुप्तप्रायः पादः। ४३. लुप्तप्रायं पदम्
४४. अत्राक्षराणि लुप्तानि। ४५. मातृकात्र अबद्धा ; पदानि च लुप्तानि।

* * *

दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाणीं मनःपूतं समाचरेत् ॥ ११७ ॥

अश्वं नैव गजं नैव व्याघ्रं नैव च नैव च ।
अजापुत्रं बलिं दद्याद्देवो दुर्बलघातकः[४६] ॥ ११८ ॥

त्याग एको गुणः श्लाघ्यः किमन्यैर्गुणराशिभिः ।
त्यागेनैव हि पूज्यन्ते पशुपाषाणपादपाः[४७] ॥ ११९ ॥

उद्योगः कलहः कण्डूर्द्यूतं मद्यं परस्त्रियः ।
आहारो मैथुनं निद्रा सेव्यमानो विवर्धते[४८] ॥ १२० ॥

तत्त्वज्ञस्य तृणं शास्त्रं शूरस्य मरणं तृणम् ।
विरक्तस्य तृणं नारी निस्पृहस्य तृणं जगत् ॥ १२१ ॥

श्रेयांसि बहुविघ्नानि भवन्ति महतामपि ।
अश्रेयसि प्रपन्ने तु क्वापि यान्ति विनायकाः[४९] ॥ १२२ ॥

न गोपयति गोप्याङ्गं न वारयति मक्षिकाम् ।
शुनः पुच्छमिव व्यर्थं श्रुतं धर्मविवर्जितम् ॥ १२३ ॥

राज्ञां [५०]विदुषां मध्ये वरयुवतीनां च सङ्गमे विरमे[५१] ।
प्रत्युषसि भुक्तसमये ताम्बूलं यो न खादयेत् स पशुः[५२] ॥ १२४ ॥

---

४६. सु. र. भा. १५६.१३६.
४७. सु.र.भा. ६४.६९.
४८. सु.र.भा. १५६.१३९.
४९. सुभाषितावली ३४२७ ; तुरीयपादो मातृकायां दुष्टः ।
५०. मातृकाऽत्र दुष्टा ।
५१. मातृकायां 'विरमेत्' इति । विरमे संभोगान्ते ।
५२. भोजराज-चारुचर्यायाम् ; दृश्यतां मलयमारुतः २. पृ. ९३ श्लो. ११७.

ददाति च न जानाति न (जानाति) ददाति च ।
यो ददाति च जानाति दाता ज्ञाता च दुर्लभः ॥ १२५ ॥

त्यागो गुणो वित्तवतां (वित्तं) त्यागवतां गुणम् ।
परस्परवियुक्तौ तु वित्तत्यागौ विडम्बनम्[५३] ॥ १२६ ॥

भटा भाग(व)ता वैद्या ग्रामणीस्तस्करस्तथा ।
याचको मूषिकश्चैव सप्तैते परभक्षकाः ॥ १२७ ॥

बाल्ये शिशूनां सुरते(च यू)नां[५४] स्तुतौ[५५] कवीनां समरे भटानाम् ।
त्वंकारपूर्वास्तु गिरः प्रशस्ताः सुखावहास्त्वादुतरा भवन्ति ॥ १२८ ॥

योधमायोधने विद्याद्भार्यां भाग्यविपर्यये ।
मित्रमापत्सु जानीयात् पुत्रमन्त्ये च कर्मणि ॥ १२९ ॥

गतानुगतिको लोको न लोकः पारमार्थिकः ।
वेलावालुकलिङ्गेन नष्टं मे ताम्रभाजनम्[५६] ॥ १३० ॥

---

५३. सु. र. भा. ७०. १८.

५४. अत्र अक्षरलोपः ।

५५. मातृकाऽत्र दुष्टा ।

५६. अन्तेऽयमेव श्लोक आदौ दुष्टैः पदैः पुनरपि लिखितः ।

अन्तः ताम्रभाजनं स्थैर्यार्थं निवेश्य तदुपरि आर्द्रसैकतसमर्पणेन स्नानसमनन्तरं पूजार्थं क्षणिकं सैकतलिङ्गं क्रियत इति संप्रदायः । एवमेव तीर्थोपान्ते बहुभिः कृते पूजावसाने स्वकीयं लिङ्गं किं कुत्रस्थमिति सन्देहे सति, ताम्रभाजनस्यापि कुत्रेत्यनिर्णयाशङ्क इत्यर्थः ॥

॥ पलाण्डुमण्डनप्रहसनम्* ॥

॥ हरिजीवनमिश्रविरचितम् ॥

सकलरसग्रहीता[1] भक्ष्यभोज्यादिभोक्ता
[2]भवजदुरितमोक्ता[3] धर्मकामार्थवक्ता ।
प्रचुरविभवकर्ता पार्वतीप्राणभर्ता
जयति सकललोके विश्वभर्ता महेशः ॥ १ ॥

(नान्द्यन्ते सूत्रधारः)

अलमतिविस्तरेण । अये ! लिङ्गोजीभट्टपत्न्या गर्भाधानावसरोऽस्ति । तत्र सम्बन्धचर्चया विलम्बो भविष्यतीति [4]बुभुक्षिताः पलाण्डुमण्डनाद्याः मनोऽभिलषित[5]तृप्तिं विना कथमाशीर्दानं करिष्यन्ति ? किं चान्यत् । तेषां शुद्धवर्णोच्चारश्च कथं सम्भावितोऽन्तरामोदमन्तरा विविधबुद्धिचतुरस्रोदीच्यवर्गेषु ? तद् यावत् सदस्यानामेव दुराग्रहः फलितोऽस्तु । (आकाशे समाघ्राय, सहर्षम्) अये ! लक्ष्यते हि कार्यसिद्धिः समीपतरा गन्धराजोपमर्दकगन्धेन । (आत्मगतम्) भवतु तावत् । [6]आर्यामाकार्य [7]समितिं करोमि । (परितोऽवलोक्य) आर्ये ! इत इतः ।

---

*इदं प्रहसनं मद्रपुरीसंस्कृतरङ्गाङ्गभूतैर्नटैर्मलयमारुतसम्पादकानां सौत्रधार्ये रङ्गे प्रयुक्तम् ।

ग्रन्थकारं तदीयानि प्रहसनान्तराणि लघुरूपकाणि चाधिकृत्य संस्कृतरङ्ग-वार्षिकपत्रिकायाः ४-सञ्चिकायां प्रकाशिता डा. जा. अर्टोलामहाशयेन मलयमारुतसम्पादकेन च लिखिता आङ्गलनिबन्धा द्रष्टव्याः । मलयमारुतस्यैव प्रथमस्पन्दे पृ. ११३-१२७ अस्यैव कवेर्विदुषमोहनं नाम लघुरूपकं प्रकाशितम् । जयपुरे रामसिंहमहाराजस्यास्थाने १७-शतके कविरयं बभूव ॥

बीकानेरस्थ - अनूपपुस्तकालयस्थां मातृकां लण्डन् - इन्दिया-आफीस् - पुस्तकालयस्थां ७४०-७-अङ्कवर्तीं मातृकामन्यां प्रायः शुद्धतरां चादाय सम्पादितमत्रेदं प्रहसनम् । पाठभेदाः बी., ल., इति संकेताभ्यां दत्ताः । उपरिनिर्दिष्टपुस्तकालयाधिकारिणो धन्यवादार्हाः ॥

१. अत्र वृत्तभङ्गः; अथवा एतादृशस्य सन्ध्यक्षरस्य पाठवलाल्लघुत्वमभ्युपगन्तव्यम् । ल. कोशे °गृहीता इति वृत्तदृष्ट्या न त्वर्थदृष्ट्या लिखितम् ।

२. ल. भवदुरित ३. बी. मोक्ती ४. बी. विभु ५. ल. लाषित

७. बी. आर्यासा ८. बी. संमर्तिं

(प्रविश्य)

नटी - अज्जउत्त ! [1]कहेहि लहु[2] । कज्जन्तरासत्ताए मह[3] कज्जं होदिति ।

[आर्यपुत्र ! कथय लघु । कार्यान्तरासक्ताया मम कार्यं भवति ।]

सूत्रधारः - आर्ये ! किमिदानीमीदृशं कार्यं त्वां चपलयति ?

नटी - अज्जउत्त ! अज्ज खु[4] [5]पलाण्डुमण्डणो णिमंतितोत्ति सवरिवारो[6] । तस्स उवचारकिदे घरम्मि धूवं संचारिअ आगदम्हि । तुमं उण [7]आअच्छिअ चेलंचलं विधूविअ तं समाणेदुं गच्छेहि ।

[आर्यपुत्र ! अद्य खलु पलाण्डुमण्डनो निमन्त्रितोऽस्ति सपरिवारः । तस्य उपचारकृते गृहे धूपं सञ्चार्य आगतास्मि । त्वं पुनरागत्य चेलाञ्चलं विधूय तं समानेतुं गच्छ ।]

सूत्र - आर्ये ! कालागुरुधूपसंचारेण गृहं नाशितं किम् ?

नटी - (विहस्य) अज्ज ! अअं [8]पलांडुगंधेति किं तुमं ण जाणसि ?

[आर्य ! अयं पलाण्डुगन्ध इति किं त्वं न जानासि ?]

सूत्र - (परितः समाघ्राय) साधु रे ! साधु । पलाण्डुमण्डनाद्याः कृतार्थीकृता एव । तदेहि [9]उपचारं कुर्वः । किं विलम्बेन ?

---

१. बी. कहहि
२. ल. लहुरं
३. बी. ल. मलअ
४. ल. खलु.
५. बी. पलण्डु
६. बी. सर्वरिणे
७. बी. आअछि ।
८. बी. पलण्डु°
९. बी. उपवारं

(नेपथ्ये)

अये बहुपलाण्डुवल्कलपरिपूर्णवीथीमवलोक्य भ्रमिताः पलाण्डुमण्डनाद्याः पलाण्डुधनिकगृहं गच्छन्ति। तत्खलु लिङ्गोजीभट्टं बोधयितुं समायाति प्रजापतिदेवः।

सूत्र - (आकर्ण्य) प्रिये! कथमिदानीं परिभ्रान्ताः पलाण्डुमण्डनाद्याः क गच्छन्ति? तदेहि उपसर्पावः।

(इति निष्क्रान्तौ ॥)

॥ प्रस्तावना ॥

(ततः प्रविशति प्रजापतिदेवः)

[1]प्रजापतिदेवः - अये! क गतो रण्डापुत्रो जारजातः [2]चण्डालशिरोमणिलिङ्गोजीभट्टः? यतः पलाण्डुमण्डनाद्या विमुखा अन्यत्र गच्छन्ति। स्मृतं स्मृतं भोः! त्र्यम्बकभट्टलिङ्गोजीभट्टयोः आवुत्तश्यालकयोः आत्मजसम्बन्धे [3]ज्ञातिग्रामण्यबाहुल्यात् पलाण्डुमण्डनाद्याः कदाचित् [4]परावृत्ता भवेयुः। भवतु तावत्, मयैव गत्वा ते समानेयाः।

(नेपथ्ये [5]उल्ललध्वनिः।)

गणपतिरविचन्द्रप्रोल्लस[6]द्देवबृन्दो
जलपवनकृशानुव्योमभूमित्रजश्च[7]।
मणिगणमनुसङ्घ[8]प्रस्फुरत्सिद्धविद्या-
द्विजजनितसमूहो मङ्गलं वो ददातु ॥ २ ॥

---

१. बी. ल. पदं नास्ति
२. ल. चांकेगल°
३. बी. नाति°
४. बी. परावृता
५. बी. सलोंल; ल. सबोंनी
६. ल. 'स' नास्ति
७. ल. त्र.
८. बी. - °संघः

(सावधानं प्रजापतिदेवः समाकर्ण्य)

अये ! लग्नं समासन्नं खलु । भवतु तावत् ब्राह्मणभोजनादौ शैघ्र्यम् ।

(नेपथ्ये सस्वरम्)

"मूषको वै प्रजापतिरासीत् । तस्य द्वौ दन्तावास्ताम् । दन्तेन दन्तेन बिलं करोति, भाण्डं स्फोटयति, हविष्यान् भक्षयति, यजमानः प्रहरति, चूंचूशब्दं करोति । यजमानं स्वर्गं लोकं गमयति । य एवं वेद ॥"*

प्रजा - (सादरं समाकर्ण्य) अहो ! वेदध्वनिः ! । आगता एव सर्वे किम् ? अहमपि तावत् हौलताम्रपात्रं पेरंभट्टं[1] कलङ्काङ्कुराचार्यं च गृहीत्वा पुनरागच्छामि ।

(इति निष्क्रान्तः ।)

(ततः प्रविशति सवाद्यं लिङ्गोजीभट्टसमवलम्बितहस्ता[2] हरिद्राद्रवलिप्ताङ्गी माल्यभूषणभूषिता दृढकच्छाविशेषनिबन्धनकुशला ताम्बूलचर्वणचतुरा प्रचल[3]न्मङ्गल[4]संस्था सुवासिनी रागसंवर्धितहर्षा चिञ्चा, गृहीतत्र्यम्बकहस्ता कथिका च ।)

भट्टौ - (अञ्जलिं बद्ध्वा) नमस्काराः । कथमिदानीं ब्राह्मणानां विलम्ब इव दृश्यते ?

([5]ननान्दृभ्रातृवध्वौ परस्परं सदृष्टिक्षेपम्)

---

* वेदवाक्यविडम्बनभूतमिदम् ।

१. ल. पदं नास्ति २. ल. °हस्तः

३. ल. 'ल' नास्ति ४. बी. °म(मं ?) डप°

५. ल. ननन्द°

कथिका - (चिञ्चां भ्रातृवधूं निर्दिश्य) अये तुज्झ[1] सपत्तीपूरणपोलिआ[2]-[3]जादाए रत्तमूलिआए कुसलं खु[4] ।

[अये ! तव सपत्नीपूर्णपोलिकाजाताया रक्तमूलिकायाः कुशलं खलु ?]

चिञ्चा - भोदीएप्पघसाएण ताए कुसलं ज्जेव्व । अज्ज[5] उण तुज्झ जादो खेमेण चिट्ठदि ।

[भवत्याः प्रसादेन तस्याः कुशलमेव । अद्य पुनस्तव जातः क्षेमेण तिष्ठति ?]

कथिका - अये ! सो दिग्घजीवी तुज्झ जादाए दिवारत्तिंपि[6] स्वरूवं सुमिरिअ चिट्ठदि ।

[अये ! स दीर्घजीवी तव पुत्र्या दिवा रात्रिमपि स्वरूपं स्मृत्वा तिष्ठति ।]

चिञ्चा - (विहस्य) एवं जेव्व एसावि रत्तमूलिआ दीग्घजीविदस्स गिअंजणअद्दिणो रूवं सुमिरिअ सुमुरिअ कीलदि ।

[एवमेवैषापि रक्तमूलिका दीर्घजीवितस्य गृञ्जनाद्रेः रूपं स्मृत्वा स्मृत्वा क्रीडति ।]

(उभे परस्परं हस्ताहस्तिकां प्रथयतः ।)

लिङ्गोजी - हे हे त्र्यम्बकभट्ट ! रजोयोग्यायाः कन्यायाः विवाहः पितुरस्वर्ग्यं जनयति इति स्मृतेर्भीतोऽहम् । चूतमञ्जरीमिव रक्तमूलिकां कन्यां परिणेतुमिच्छामि ।

---

१. बी. तुमूस ; ल. तुस्स २. बी. मूरणग्नूलिआ ; ल. पूरणमूलिआ
३. ल. लादाए ४. बी. ल. रखु ५. बी. ल. पदं नास्ति
६. बी. ल. °मि

त्र्यम्बकः - त्वया एष भागिनेयो गृञ्जनाद्रिर्दृष्टः खलु ?

लिङ्गोजी - हे हे त्र्यम्बक, भवतु तावत्। गृहिणीं पृच्छामि। (विलोक्य) अये पूर्णपोलिके ! इत इतः।

पूर्णपोलिका - कथं अज्जलिङ्गो ! [कथमार्यलिङ्गः !]

लिङ्गोजी - प्रिये ! तव जाताया रक्तमूलिकाया विवाहो धनिकत्र्यम्बक-भट्टपुत्रेण त्वद्भागिनेयेन गृञ्जनाद्रिणा विचारितोऽस्ति।

[1]पूर्णपोलिका- अज्जउत्त ! जइवि एदं अदिरमणिज्जं तहवि लशुनपंतो दाणिं मरणं समासाध(द)इस्सदि त्ति कठिणं।

[आर्यपुत्र ! यद्यप्येतद् अतिरमणीयं तथापि लशुनपन्त इदानीं मरणं समासादयिष्यतीति कठिनम्।]

लिङ्गोजी - प्रिये ! यद्यपि एवमेव, तथापि गृञ्जनाद्रिरल्पवयस्कः खलु ? किं तेन वृद्धेन ? शैघ्र्यमेवोद्वाहे भवतु। तावद् वाङ्निश्चयः प्रथमम्।

[2]पूर्णपोलिका - को संदेहो। (परितोऽवलोक्य) हे हे कुत्थिए ! एसा रत्तमूलिआ तुज्झंके समप्पिदात्थि।

[कस्सन्देहः ? हे हे कथिके ! एषा रक्तमूलिका तवाङ्के समर्पितास्ति।]

कथिका - अये अणुग्गहिदह्मि। गिंजणद्दि ण[3] तुह वालो किम्।

[अये अनुगृहीतास्मि। गृञ्जनाद्रिः न तव बालः किम् ?]

त्र्यम्बकः - (श्रुत्वा सोल्लासम्) भवतु तावद् वाङ्निश्चयो वरकन्ययोः।

(यावत् कलङ्काङ्कुरस्समायाति, तावत् प्रविशति लशुनपन्तः।)

---

१. २. बी. ल. मूलिका. ३. बी. 'ण' नास्ति; ल. णा.

[1]लशुनपन्तः - रे रे परार्थविघट्टक ! लिङ्गोजीभट्ट ! आनिषेकावधि रक्तमूलिकायाः प्रत्याशया जीवितमात्रावशिष्टस्य मे, अस्वर्ग्यसंसाधनेन किमौन्नत्यं भवेत् ? गृञ्जनाद्रिस्तु मत्तो वयसा न्यून एव, साक्षात् सहजः। तस्य काचिज्जीविताशाप्यस्ति। किमेतया त्वरया ? किं पुनस्तव कन्यौत्पत्तिर्न स्यादेवाद्य गर्भाधाने चिञ्चायाः ?

[2]पूर्णपोलिका- (आत्मगतम्) एसो वुड्ढो मझ जादाए अकज्जं करेदि। होदु तावत्, चिन्तइस्सं।

[एष वृद्धो मम जाताया अकार्यं करोति। भवतु तावत्, चिन्तयिष्यामि।]

कथिका - (आत्मगतम्) एसो लसुनपंतो वुड्ढो होई। ता धणवलेणेव्व विआहो जुज्जइ। (इति स्वर्णं निष्कास्य प्रदर्शयति।)

[एष लशुनपन्तो वृद्धो भवति। तद् धनबलेनैव विवाहो युज्यते।]

लिङ्गोजी - भवतु तावद् एतेनैव सम्बन्धो[3] लशुनपन्तेन। दृश्यते हि द्रव्यबाहुल्यम्। अलं तेन गृञ्जनाद्रिणा तरुणेनापि।

चिञ्चा - हे हे सुवण्णदाणनियमं करेहि। [हे हे ! सुवर्णदाननियमं कुरु।]

कथिका - अये ! दहकरिसमितं सुवण्णं तुझ्झ दावं।

[अये ! दशकर्षमितं सुवर्णं तव तावत्।][4]

लिङ्गोजीभट्टः - रे रे, आयुःप्रमाणमनियतं हि प्राणिनाम्[5]। ततः किमेतावता सुवर्णेन ?

---

१. बी. नास्ति; ल. पाठः (पन्तः?) २. बी. ल. पोली

३. ल. सम्बन्धेन

४. तह करिस्सामि तं सुवण्णं तुज्झ दावं। [तथा करिष्यामि, तत् सुवर्णं तव तावत्] इत्यपि पाठः स्यात्।

५. बी. इदं वाक्यं पंक्तित्रयादधो दृश्यते।

लशुनपन्तः - (श्रुत्वा सहर्षम् आत्मगतम्) पलाण्डुमण्डनस्य भ्रातुः विंशोत्तरशतवर्षाभ्यधिकस्यापि सुवर्णबलेनैव [1]रक्तमूलिकया विवाहस्संसाधितः। (प्रकाशम्) भो भो लिङ्गभट्ट! लशुनपरिपुष्टस्यापि कदापि मरणं भवति ?

लिङ्गोजीभट्टः[2] - भवतु तावत्। कुत्रास्य द्रव्यस्योपयोगः ?

(इति यथेष्टमर्थं प्रदर्शयति।)

[3]**पूर्णपोलिका** - (दृष्ट्वा सहर्षम्) रे रे पुत्त लशुनपन्त! एव्वं जेव्व जुज्जइ। ता दाणिं तुह उत्तरकज्जजोग्गं धणं किं ण [4]समप्पेसि।

[रे रे पुत्र लशुनपन्त! एवमेव युज्यते। तदिदानीं तव उत्तरकार्ययोग्यं धनं किं न समर्पयसि ?]

लशुनपन्तः[5] - (विचिन्त्य) यद्येवं तदा कुत्रोपयोगो लशुनगृञ्जनक्षेत्रस्यास्य ? * (इति [6]स्वीयं क्षेत्रं प्रदर्श्य) अये! यदि कदाचिदेवं तदा मम खलु क्षेत्रेऽस्मिन्नेव लिङ्गसंस्थापनमात्रं भवतु। क्षेत्रमुत्कृष्टमेवास्ति, किमन्यत् ?+

[7]**पूर्णपोलिका** - (लिङ्गमुखमवलोक्य) सिज्झं णो कज्जं। होदु तावल्[8] लशुणपन्तेणेव्व संबंधो दाणिं।

[सिद्धं नः कार्यम्। भवतु तावल्लशुनपन्तेनैव संबन्ध इदानीम्।]

लिङ्गोजीभट्टः - ममाप्येवं मनसि वर्तते।

(ततोऽपटीक्षेपेण प्रविश्य)

---

१. बी. पिण्डमूलिकया ; ल. सलगमया

२. बी. पंक्तित्रयादूर्ध्वं लिखितम् ; ल. नास्ति।

३. ७. बी. ल. पोली ४. बी. समप्पसि ५. बी. °पंतम्

६. बी. स्वीय° ८. बी. ल् नास्ति

* लशुनगृञ्जनक्षेत्रम् तद्रोहणार्थः केदारः। + क्षेत्रलिङ्गशब्दयोः श्लेषः।

गृञ्जनाद्रिः - रे रे परोपकारनिन्दक ! राजा किं विधवाभ्योऽन्नसत्रं न ददाति ? ही ही भोः आश्चर्यमाश्चर्यम् ! कथं हि दृढकच्छासंसाद्य(?)-स्कन्धाङ्गुलिलग्नवालाः पदातिभिरुद्वेजिताश्च भुक्तान्नशेषपूरित-कच्छाकञ्चुक्य(का?)न्तराः करचुलकप्रपापानोन्मुख्युः[1](खाः ?) द्रविणदर्शनमात्रेणैव स्वदेशाचारं विस्मरन्ति ? आम्[2] ।

लिङ्गभट्टः - (आत्मगतम्) लग्नः खलु दुष्टकण्टकः । भवतु, एनं प्रतारयामि । (प्रकाशम्) रे रे गर्भाधानावसरः संनिहितः । तस्मान्निमन्त्रितब्राह्मणानां भोजनं भवतु सत्वरम् ।

(नेपथ्ये)

रे रे अभिशापिनायक ! कलङ्काङ्कुर ! उन्मत्तभैरव ! शुनश्शेफ ! अगम्याप्राञ्जल ! [3]गुरुतल्पग ! स्नुषानाथ ! चेटीचतुरस्र ! कालपुरुष ! मित्रकर्तरि ! विश्वासघातेन्द्र ! विश्ववञ्चक ! [4]नारायणकण्टक! सूचीमुख ! दुष्टमुष्य(ख्य?)! अभक्ष्यराक्षसाः ! यूयमत्रैव तिष्ठथ । यतोऽन्तःस्थलसंकोचात् रथ्यायामेव भोजन-पङ्क्तिस्सावकाशेन भवेत् । प्रतिष्ठिताः* पलाण्डुमण्डनाद्याः, केचन गच्छन्त्वन्तः ।

(ततश्च प्रविशन्ति पलाण्डुमण्डनमिथ्याकूटाद्याः कतिपये[5] ।)

पलाण्डुमण्डनः-(विलोक्य) अये ! चित्तपावनेनास्माकं न कदापि पङ्क्तिरासीत् ।

---

१. बी. °उन्मुख्यः
२. बी. अं ; ल. आ
३. बी. गुरुतुल्य सुषानाथ
४. बी. नारायणक जगत्प्रतारक
५. बी. ल. °याः
* लब्धप्रतिष्ठा इत्यर्थः ।

चित्तपावनः - भो भो ह्यः समाचरितमेव विस्मृतं किम्, यत् खलु खाण्डेरायार्चनविधौ अनेकप्रकारपलाण्ड्वादिनिरूपितपरमान्नभक्षका भवन्त एव न स्थिताः[1] किम् ?

पलाण्डुमण्डनः-(विहस्य चित्तपावनं समालिङ्ग्य) भ्रातः ! पलाण्डुरप्यस्त्यत्र ?

चित्तपावनः - नो चेत् किमन्यदस्त्यत्र ?

(पलाण्डुमण्डनः सगर्वं तिष्ठति[2] ।)

गृञ्जनाद्रिः - अये ! किं केवलपलाण्डुना ? गृञ्जनरहितं पशूनां शष्पप्रायमिदं भोजनम् ।

लशुनपन्तः - रे रे किमेतया नीरसचर्चया ? ओषधीनां नाथे लशुनानन्दकन्देऽभ्युदिते ज्योतिरिङ्गणप्रायाणां पलाण्ड्वादीनां कुत्रावकाशः ?

पलाण्डुमण्डनः-भो भो भ्रातः ! पलाण्डुरपि लशुनाधिको न भवति किम् ? यतः—

यत्सन्तानपरम्परा प्रविलसत्तारासमूहस्तथा
मुक्ताहीरकपुष्परागमणयो नैते शतांशैः समाः ।
तृप्तिर्येन गरीयसी प्रवितता दृङ्मात्रतो[3] जायते
कन्दः कोऽपि दिवि क्षपाकर इव[4] क्षेत्रे परं द्योतते ॥ ३ ॥

लशुनपन्तः - [5](सरोषम्) एवम् !

यत्पोटिका को(टि)समीरणानां[6]*
हन्त्री ततः[7] तत्समता कथं स्यात् ।
गन्धेन यस्यैव सुरासुराणा-
मन्नं भवेत् तृप्तिकरं विशेषात् ॥ ४ ॥

---

१. बी. स्थिताम् २. बी. सर्वगर्वंतिवृत्ति
३. ल. दृङ्मात्रता ४. बी. द्रक ५. बी. 'सरोषं' नास्ति
६. ल. 'टि' नास्ति ; उभयत्र उपरि 'समीरणा' इत्येव ७. ल. तलः
*बहूनां वातदोषाणामित्यर्थः

गृञ्जनाद्रिः - (उभौ निरस्य) श्रूयतां तावत् -

प्रवालशोभा खलु यस्य चेटी तद् गृञ्जनं व्यञ्जनराजकल्पम् ।
न तत्स्वरूपं प्रविदन्ति मूढाः कथं हि ते ज्ञानविधानदक्षाः ॥५॥

(पुनः [1]प्रविश्य प्रजापतिदेवः)

प्रजापतिदेवः- रे रे ब्राह्मणानां भोजने कथं विलम्बः ?

चिञ्चा - अये ! पआवइदेव्व परिपक्कसूपसाकादिणं[2] जाव पलाण्डुलसुणसंकरो ण होदि ताव विलंबेहि [3]वह्मणाणं ।

[अये प्रजापतिदेव ! परिपक्वसूपशाकादीनां यावत् पलाण्डुलशुनसंकरो न भवति तावत् विलम्बो हि ब्राह्मणानाम् ।]

प्रजापतिदेवः-भवतु तावत्, पत्रावलीमासादयामि ।

(इति पत्रावल्यासादनं नाटयति ।) (नेपथ्ये)

अहो ! पलाण्डुलशुनगन्धेन[4] स्वर्गीकृतोऽयं लोकः ! रे रे पश्य पश्य ! कथम् अभाग्या उदीच्या नासिकां संयम्य पलायनपरा दृश्यन्ते ? धन्याः खलु सार्वपथभोजनोद्धताः दाक्षिणात्याः ! अत एव कथमतीव स्पष्टतरैर्वर्णोच्चारैः पदक्रमजटालापं प्रथयन्ति !

लिङ्गभट्टः - एते ज्ञातिश्रेष्ठाः मण्डपमणयः कुतो न समाविशन्ति ?

(ततः प्रविशन्ति)

भूत्यालिङ्गितविग्रहाः करतलव्यासक्तपत्रावली-
गण्डूकादिविशेषभूषणरताः शुष्कोदराः सर्वतः ।
काषायैर्वसनैर्वृताः परमहो शीर्णैश्शतच्छिद्रकैः
शोभन्ते [5]परितः सहस्रनयनभ्रान्तिं दधानाः किमु ॥ ६ ॥

---

१. ल. प्रविशति २. ल. °रिणं ३. बी. वह्मणणं
४. बी. °गंधो ५. बी. परिसः

अपि च-

जीर्णवस्त्रशकलस्फुरणैः किं शेषमेव चलजिह्वमिदानीम् ।
स्मारयन्ति बहुधा [1]न मुधैतत् कालकूटसमदौष्ट्यभृतो हि ॥ ७ ॥

आरनालोन्मत्तदष्टयः मातुलकन्योपहासविकस्वराः गुरुमत[2]-विदूषकाः प्रावरणव्याजेन[3] पलाण्डुखण्डं चर्वयन्तः पेरम्भट्टाद्याः ज्ञातीयाः ।

चिञ्चा - हे हे पूलिए ! रत्तमूलिए ! तुम्हेहि पडिवेसनं करीअडु[4] ।
[हे हे पोलिके ! रक्तमूलिके ! युष्माभिः परिवेषणं क्रियताम् ।]

[5]पूर्णपोलिका - होदु ता जाव अहं जेव्व पडिवेसइस्सम् । [भवतु । तद् यावदहमेव परिवेषयिष्यामि ।]
(इति दृढतरां कच्छां बन्धयितुं[6] उद्युक्ता । तावत् ततो गृञ्जनानि पतितानि दृष्ट्वा स लालायितो[7]—)

गृञ्जनाद्रिः - (सोत्साहम्) हे हे मातुलानि ! कथमिदानीमेवैतेषां गृञ्जनानां वृथाव्ययः प्रकल्पते ?

[8]पूर्णपोलिका- (गृञ्जनाद्रेर्मुखं व्याचुम्ब्य) उत्त अत्थि हि मज्झ समीवे[9] धणं हि[10] । [पुत्र ! अस्ति हि मम समीपे धनं हि ।]
(ततः प्रविशन्तीं स्वातीबिन्दुग्रहणोत्सुकां शुक्तिमिव, लौहयष्टि-समाकर्षिकां[11] चुम्बकघटितमूर्तिमिव लशुनपन्तं गृहीतुकामां रक्तमूलिकां विलोक्य) जादे ! तुझ्झ जुग्गो जेव्व वरो, ण संदेहो ।
[जाते ! तव योग्य एव वरो, न सन्देहः ।]

---

१. ल. 'न' नास्ति २. बी. °मत्तः ३. ल. °व्याजे
४. ल. करीअदु ५, ८. पोली ६. बी. बन्धितुं
७. बी. ल. °इन्तो ९. बी. अ ... हि; ल. अणं
१०. बी. ल. वाक्ये 'हि'-द्वयं दृश्यते ११. बी. °समां वर्षिकाम्

(लशुनपन्तः सोत्साहं यावदट्टाट्टहासं निरूपयति तावत् कासश्वासाधिक्येन मूर्च्छितः पतति ।)

पलाण्डुमण्डनः - रे रे पलाण्डुद्रवं गृहीत्वा त्वरयन्तु ! अन्यथा लशुनपन्तस्य अन्यथाभावो भवेत् ।

(गृञ्जनाद्रिः गृञ्जनं गृहीत्वा धावति, आरनालभट्टः आरनालघटं समानयति ।)

त्र्यम्बकः - भ्रातः लिङ्गभट्ट ! वृष्यं किञ्चिदस्मै निवेदय ।

(लिङ्गभट्टः मूर्धान्दोलनं विधाय पर्यवलोकयति ।)

चिञ्चा - जादे रत्तमूलिए ! [1]मूलिआए रसं चिञ्चारससंवलिदं करेहि । [जाते रक्तमूलिके ! मूलिकाया रसं चिञ्चारससंवलितं कुरु ।]

(रक्तमूलिका शीघ्रं तथा करोति ।)

मिथ्याकूटभट्टः-(मिथ्याकूटद्रवं गृहीत्वा) रे रे मूर्खाः ! पश्यन्तु क्षणेनैव मदीयं चमत्कारम् । (इति शीघ्रं लशुनपन्तस्य मुखे ददाति ।)

(नेपथ्ये)

रे रे श्मशानक्रियासंष्ठुलाः ! लशुनपन्तस्य परलोकसाधकाः[2] ! परिशुष्कपलाण्डुलशुनगृञ्जन[3]काष्ठै रचिता चिता[4] दूरे विधीयताम् । यतोऽस्य मुखे यमदूताः[5] शौचं कृत्वा पलायिताः । तदिदानीं जीवितोऽयं निस्संशयम् ।

लिङ्गभट्टः - सत्यमेवातिवृष्य[6]मौषधं खलु ।

(तावज्जागरितो[7] लशुनपन्तः ।)

---

१. ल. पदं लुप्तम् २. ल. साकाः
३. बी. रूप इत्यधिकम् ४. बी. ल. °तां
५. ल. मम दन्ताः ६. ल. °वृद्ध ७. बी. ल. जागृतः

लशुनपन्तः - रे रे समानीयतां लशुनग्रन्थिः। यतोऽतिपित्तक्षोभेण मूर्च्छितोऽस्मि।

पलाण्डुमण्डनः-साधु रे, साधु ! ममाप्येवमेव[1] भवति हि बहुधा।

गृञ्जनाद्रिः - मूर्खसमाजे पतितम्। रे रे हतधियः! मधुररसं विना कथं पित्तक्षोभनिवृत्तिः? तद् गृहाण गृञ्जनरसम्।

लशुनपन्तः - (विहस्य)

प्रभवति लशुनं न चेत् प्रहर्तुं खलु कथनं किमिहास्ति [2]गृञ्जनस्य।
तिमिरवधधुरीण[3] उष्णरश्मिर्यदि न भवेदिह कोऽस्ति शीतरश्मिः ॥ ८ ॥

अये लशुनपोटिके* सकलदुःखसन्त्रोटिके
महापथसुघोटिके [4]परमपापसंमोटिके।
सुगन्धहततोटिके[5] परमसिद्धसच्छोटिके
प्रसीद परमेश्वरि क्षुधिततृप्तिसद्रोटिके ॥ ९ ॥

(पूर्णपोलिका [6]कच्छां शिथिलयन्ती वामहस्तेन लशुनपोटिकां निष्कास्य तन्मुखे ददाति यावत्, तावत्-)

गृञ्जनाद्रिः - (विहस्य) कथमेतेषां मूढधियां दुराग्रहः?

प्रवालरागे सरसे सुधायाः
प्रेमाङ्कुरे भोगविधानशीले।
यद्दर्शनात् सात्त्विकभाव आस्ते
तद्गृञ्जने नास्तिकतां प्रपन्नाः ॥ १० ॥

---

१. बी. 'एवं' नास्ति २. ल. 'गृ' नास्ति
३. बी. ल. धुरीया ४. बी. पद°
५. ल. पोली इत्यधिकमत्र। तोटिकाशब्दस्यार्थो न विशदः। ६. बी. कष्टां
* 'पोटिका'-शब्दः पूर्वमपि प्रयुक्तः, तस्य अर्थस्तु न विशदः; लशुनपाकविशेषस्य तथा व्यवहारः स्यात्।

लशुनपन्तः - (नेत्रे समुन्मील्य [1]'अये लशुनपोटिके' इत्यादि पठित्वा समास्वाद्य)
अहह ! सत्यम्, एवमेव

स्वरूपसादृश्यवशात् सुधांशुं
पिबन्ति देवा न हि तत्र चित्रम् ।
यत्खण्डसादृश्यवशात् स एव
पुनर्भवेद् वन्द्यतरो जगत्याम् ॥ ११ ॥

लिङ्गोजीभट्टः - अये पोलिके ! त्वत्पुण्यप्रभावेणायं जीवितः, ते पुत्र्यपि भाग्यवती, यत आजन्म नैश्चिन्त्यसाधनद्रव्यलाभः, पतिप्राणलाभश्च सम्भावितः समनन्तरमेवास्याः ।

(ततोऽपटीक्षेपेण प्रविशति गृहीतसमित्कुशस्रुवाज्यस्थालीकः पेरंभट्टः[2] पुरोधाः)

पेरंभट्टः - रे रे [3]स्नुषापुरीणां भूयान् संमर्दः खलु । तद् यावत् लशुन-पलाण्डुगन्धाच्छादनं भवतु । कथमधिकं कष्टम् महावात्या ! तद्वल्कलेनाच्छन्नं नभः अनामन्त्रितान् वैदिकानाकारयत्येव । भवतु तावद् गर्भाधानक्रियाप्रारम्भः ।

(इति यावत् वेद्यां कुशप्रतिनिधित्वेन लशुनपलाण्डुपत्रमास्तृणाति तावत् -)

(लिङ्गोजीभट्टः चिञ्चां विलोक्य सव्यङ्ग्यं कामचेष्टां निरूपयति ।)

चिञ्चा - (स्वगतम्) कहं एत्थज्जेव्व[4] गब्भाधाणं होस्सदित्ति ।
[कथमत्रैव गर्भाधानं भविष्यति !]

---

१. बी. अए २. ल. पेरंभट्टः इति नास्ति
३. ल. सुखा° स्नुषापुरीयाणाम् इति तत्पक्षीयानामित्यर्थे स्यात् ।
४. बी. ल. ज्जेण

(पतिमुखमवलोक्य लक्ष्मणां निःकास्य भक्षणं नाटयति ।)

लिङ्गोजीभट्टः- (स्वगतम्)[1] भवतु तावद् आत्मपौष्टयं संसाधये, यत्खलु आञ्जनेयचीत्कारप्रतिहतपुंस्त्वजनोऽपि पलाण्डुभोगमात्रेण पुरुषो जायते। (इति यथेष्टं पलाण्डु[2]भक्षणं हविश्शेषमिव निरूप्य[3] विभूतिवन्दनव्याजेन [4]भङ्गाभक्षणं निरूपयति । अपवार्य संस्कृताग्नौ इन्धनव्याजेन तमोकपलं दत्वा धूमनिवारणव्याजेन वंशिकया [5]धूमपानं करोति ।)

पूर्णपोलिका - (सक्रोधम्) अये ! ईदिसो कुलाआरो कहिंवि ण दिट्ठो । मए वि जादं जेव्वत्थि[6] गब्भाधाणं । अच्छरिअं अच्छरिअं[7] ।

(इति तद्धस्तात् लक्ष्मणामाकर्षयति ।)

[अये ! ईदृशः कुलाचारः कुत्रापि न दृष्टः । मयापि (मय्यपि) जातमेवास्ति गर्भाधानम् । आश्चर्यमाश्चर्यम् !]

गृञ्जनाद्रिः - (विलोक्य) अधुनाऽस्माकं शैलपात एव समुपस्थितः, जलप्रवेशो वा ।

(इति सत्वरमुत्थाय पूर्णपोलिकामनुमोदयति । पूर्णपोलिका गृञ्जनाद्रिं साहाय्यमवाप्य समाक्रु(क्रो)शति ।)

कलङ्काङ्कुराचार्यः- (उत्थाय) रे रे गृञ्जनाद्रे[8] ! कथमङ्गवैकल्यं[9] कर्मणः करोषि ?

---

१. बी. तम् इति स्वगतम् इत्यस्य स्थाने
२. बी. °भक्षण° ३. बी. ल. निरूपयित्वा
४. बी. भङ्गाम् ५. बी. धूम°
६. क्वाथि ७. ल. एकमेव अच्छरिअं
८. ल. गृंजनाद्रेः ९. बी. °वैकल्पम्

कथिका - (उत्थाय) हला ! वअणवंधाए[1] तुए ण जुत्तं। अण्णहा किं गिंजणद्दी कुवारो जेव्व चिट्ठदि।

[हला ! वचनबद्धायास्तव न युक्तम्। अन्यथा किं गृञ्जनाद्रिः कुमार एव तिष्ठति ?]

(इति परस्परकोलाहले शिथिलकच्छकञ्चुकी(क)तो लशुनपलाण्डुगृञ्जन-मूलिकाः परितः पतन्ति।)

पलाण्डुमण्डनाद्याः - (दृष्ट्वा सरोषम्) रे रे असभ्याः खल्वेताः व्यर्थं पलाण्ड्वाद्यमृतं नाशयन्ति।

मिथ्याकूटभट्टः - (कोलाहलविशेषं दृष्ट्वा भीताया रक्तमूलिकायाः कच्छा[2]-विकृतभावं ज्ञात्वा) रे रे दृश्यते हि रक्तमूलिके ! पित्रा बहु लालिताऽसि। परंतु[3] सकलदाक्षिणात्यप्राणाधारस्य मिथ्याकूटस्य अवज्ञानेन युक्ता परम् आगतप्राया एव दुष्टा उदीच्याः, तेषामन्यथैव बोधो भवेत्।

(नेपथ्ये)

रे रे तदिदानीं परस्परमातुलकन्याद्युपहासो निवार्यताम्। समागता एव परोपहासप्रथनशीला उदीच्याः।

(ततः प्रविशन्ति करावलम्बितमत्स्यैः[4] शिष्यवर्यैः सह झल्लरी-झाङ्कार[5]भेरीभाङ्कारभट्टाचार्याः।)

[6]भट्टाचार्यः - (परितोऽवलोक्य समाघ्राय च) [7]शिव शिव ! आः ! निर्वेश्यानां कृत्यमेतत् ! हा कष्टम् !

---

१. बी. एव्वु एव्वण
२. बी. °याकस्था°
३. ल. 'परं तु' नास्ति
४. बी. 'पाठीनभक्षैः' इत्यधिकम्
५. बी. द्रांकार°
६. बी. भट्टाचार्याः
७. बी. शिवस

(इति नासामुखं पिधाय [1]तिष्ठन्ति ।)

शिष्याः—हे हे[2] भट्टाचार्य ! दिनत्रयं स्थापितमत्स्यानां कदापि विकृत-भावो[3] भवेदिति पाकस्थलं शीघ्रमुपदिश ।

भट्टाचार्यः - रे रे[4] वेदबाह्यगृहे [5]निपतितं, कथमस्माकमत्र पाकावस्थितिः [6]निर्वेश्यानां समाजे ?

दाक्षिणात्याः- रे रे विकृतमत्स्यगन्धेन मारिता वयं क व्रजामः ?

भट्टाचार्यः - रे रे धर्मबाह्य ! न जानासि प्रायो धर्मम् । संस्मर—"देवान् पितॄन् समभ्यर्च्य खादन् मांसं न दोषभाग्" इति ।

दाक्षिणात्याः - (सकोलाहलम्) रे रे कलिवर्ज्यप्रकरणे[7] मांसनिषेधात् कथमेतत् ?

भट्टाचार्यः - (विहस्य) भवतु 'तुष्यतु दुर्जन' - न्यायेन । पूर्वं तस्यैव[8] निर्मूलत्वं, तत्रापि मत्स्यनिषेधः कास्ति ?

दाक्षिणात्याः - यद्येवं मत्स्यविधानं च कास्ति ?

भट्टाचार्यः - प्रायो भ्रान्तः कात्यायनाचार्यः [9]'मासद्वयं तु मत्स्यैः' इत्यादिषु ? किञ्च, 'पाठीनरोहितावाद्यौ प्रशस्तौ हव्यकव्ययोः' इत्यपि प्रायो(य उ)न्मत्तप्रलपितमेवास्ति किम् ?

दाक्षिणात्याः - (एतस्य मृषाभिशापं विना पराजयः कथं स्याद् इति संचिन्त्य प्रेरितः कश्चित् । स यावत् राजकीयं पदातिं गृहीत्वा समायाति तावत् प्रकल्पितवचनैः प्रामाण्यं [10]स्थापयन्ति । ततः

---

१. बी. तिष्ठति
२. बो. हे हे
३. बी. अपि इत्यधिकम्
४. बी. रे
५. बी. विपतितं
६. बी. निर्वश्यानां
७. बी. °प्रकारणे
८. बी. 'व' नास्ति
९. बी. भास°
१०. बी. स्थापयति

[1]प्रविशति राजकीयः प्रधानपुरुषः, भट्टाचार्यं बद्ध्वा ताडयति ।)

भट्टाचार्यः - निरपराधस्य मम ताडनं किमिति न जाने ।

पुरुषः - [2]ले ले तुमं इदिसो जं[3] [4]अह्माणं मारणप्पओअं कलेसि । [5](पदातिं निर्दिश्य) होदु होदु ताडणं उणोवि बहुदरं ।

[रे रे त्वम् ईदृशो यन्मारणप्रयोगं करोषि । भवतु भवतु ताडनं पुनरपि बहुतरम् ।]

(पदातयः [6]ताडयन्ति ।)

भट्टाचार्यः - (सवैकल्यम्) भो भो भ्रातरो दाक्षिणात्याः ! किमिदं सत्यं यूयं साक्षिणः किं नात्र ?

दाक्षिणात्याः - वयमेव साक्षिणः । कस्सन्देहः ?

भट्टाचार्यः - तर्हि किं न वदथ ?

दाक्षिणात्याः - अस्माकं साक्षित्वे प्रामाण्यमस्ति ?

भट्टाचार्यः - [7]वेदविदां भवतां साक्षित्वेऽपि सन्देहः ?

दाक्षिणात्याः - (पुरुषं निर्दिश्य) यद्येवम् तदा तु अयं भट्टाचार्यो वध्य एवाभिचारिकः ।

(इति पलाण्ड्वादिसामग्रीं प्रदर्शयन्ति । पुरुषो दृष्ट्वा सत्यमेव विज्ञाय ससामग्रीकं सशिष्यं भट्टाचार्यं गृहीत्वा निष्क्रान्तः ।)

दाक्षिणात्याः - (परस्परं हस्ताहस्तिकां दत्वा) कथं शत्रुपराजयः संसाधितो जगदीशेन ? एवमेवाभ्युदयो भवतु मित्राणाम् ।

---

१. बी. प्रविशन्ति
२. बी. ललें
३. बी. सेजं
४. ल. आह्माणं
५. बी. पदाती
६. बी. तोदुयंति
७. बी. वेदे°

शत्रुर्निरस्तः प्रहतः समस्तो
विघ्नान्धकारः, प्रथिता च विद्या ।
अद्यापि यस्यास्ति कलेर्निषिद्धे
भ्रमः पदार्थे स कथं न[1] नष्टः ॥ १२ ॥

भवतु पुनः सुमुहूर्ते गर्भाधान[2]विधानं साधयामः ।

लिङ्गोजीभट्टः- तर्हि मुहूर्तान्तरमेव मङ्गलाय ।

(इति उत्थिताः सर्वे ।)

तथापीदमस्तु भरतवाक्यम्-

सुमुहूर्तेन राज्यं स्यात् सुमुहूर्तेन दिग्जयः ।
सुमुहूर्तेन विघ्नानां नाश एव न संशयः ॥ १३ ॥

(इति निष्क्रान्ताः सर्वे ।)

॥ पलाण्डुमण्डनं नाम प्रहसनं सम्पूर्णम् ॥

PALĀṆḌUMAṆḌANA

The Characters in the order of their appearance

Prajāpatideva, a Pandit, master of the ceremony.
Liṅgojībhaṭṭa, a Pandit.
Ciñcā, second wife of Liṅgojī. (Tamarind)
Tryambakabhaṭṭa, brother-in-law of Lingojībhaṭṭa. (Cocoanut)
Kvathikā, wife of Tryambaka. (Boiled fluid dish)
Pūrṇapolikā, first wife of Liṅgojī. (A kind of sweet cake, *poli*)
Laśunapanta, elder son of Tryambaka and Kvathikā. (Garlic)

---

१. ल. इयं २. बी - दन°

Gṛñjanādri, younger brother of Laśuna. (Onion-small variety)
Palāṇḍumaṇḍana, a guest. (Onion-big variety).

Cittapāvana, another guest. Maharashtra Brahman

Raktamūlikā, daughter of Pūrṇapolikā. (A red edible root)
Āranālabhaṭṭa, a guest. (Gruel)

Mithyākūṭabhaṭṭa, a guest. (a Maharashtrian soup—curds mixed with ground rice, pulses, mustard and fenugreek (Vendayam)

Dākṣiṇātya-1, Deccani Pandit-1

Perambhaṭṭa, priest, an Āndhra

Kavakāṅkura, another priest. (Mushroom)

Jhallarī-Jhāṅkāra, Bheribhāṅkāra Bhaṭṭācāryas, guests. Bengali Pandits
Śiṣya, pupil of above

Dākṣiṇātya-2. Deccani Pandit-2
Puruṣa, Official
Policemen
Other Brahman Pandits & others.

The Play

The whole action of the play is enacted in a hall within a house where arrangements are afoot for conducting the religious ceremony of *garbhādhāna*. The priests and other brahmins gather for the ceremony and the feasting. The food habits of these Pandits from different parts of India, Maharashtra, Andhra Bengal and other parts of the north are used as a means of making fun, particularly their desire to taste articles of food like onion, garlic and others which are prohibited by the Śāstras but which they consume stealthily. The poet works in also an additional episode of the fixing up, for the sake of large money, the marriage of a young girl with a wealthy old kinsman. The characters are mostly named after the vegetables and dishes which they are fond of.

Prajāpatideva, the Purohita enters the marriage hall where the religious ceremony has to be conducted for the husband and wife, *Liṅgoji Bhaṭṭa* and *Ciñca*. He finds that the guest-brahmins

Palāṇḍumaṇḍana etc. are turning away from the place and looks out for the reason; the brothers-in-law *Tryambaka Bhaṭṭa* and Liṅgoji Bhaṭṭa are discussing the marriage alliance of their children and the guest-pandits who had comc to attend the religious function and participate in the feast were hence leaving. He wants to go and fetch them back. The auspicious time for the religious function (*garbhādhāna*) arrives and he wants that the feasting of the brahmins should be gone through quickly. He would now go out to fetch *Perambhaṭṭa* and *Kavakāṅkurācārya* who are to join the function.

Enter the husband and wife, Liṅgoji and Ciñcā. Enter also the elder pair Tryambaka Bhaṭṭa and *Kvathikā*. While Liṅgoji is enquiring about the delay in the arrival of the brahmins, Kvathikā asks her brother's wife Ciñcā about the welfare of *Raktamūlikā*, daughter of her brother Liṅgoji's first wife *Pūrṇapolikā*. Ciñcā enquires of the welfare of Kvathikā's son, *Gṛñjanādri*. It transpires from their talk that Raktamūlikā and Gṛñjanādri are in love with each other.

While all the elders talk as if they are favourable to this marriage alliance, Liṅgoji's firsr wife Pūrṇapolikā raises hte difficulty that *Laśuna Panta* being the elder brother of Gṛñjanādri, passing him over and marrying the younger would kill the elder. In reply it is said that the elder had become too old for marriage. They are all therefore finally agreed and happy about thc marriage of Gṛñjanādri and Raktamūlikā.

Now enters Laśuna Panta, elder brother of Gṛñjanādri, and an invalid. He too is desirous of marrying Raktamūlikā and says that Gṛñjanādri, his youger brother can wait. Pūrṇapolikā is first afraid of the oid Laśuna Panta's plans to marry Raktamūlikā. Kvathikā however thinks that if the old Laśuna Panta would offer a large some of money, the marriage could be fixed. This tempts Liṅgoji and Ciñcā and Laśuna is not only prepared to give a large amount of cash but also to make over some lands where he was growing garlic etc. Everybody, on the male and the female side, decides to give Raktamūlikā to Laśuna Panta,

Enter young Gṛñjanādri. Liṅgoji, to put him off the track of marriage, turns to the feasting of the brahmins which has been arranged for. Behind the curtain is heard the call of the different persons who had come for the feast.

Enter *Palāṇḍumaṇḍana*, *Cittapāvana* and others. Palāṇḍu displays abhorrence of the Cittapavāna. The latter lets out the secret of the former eating onions etc. Lest each one should expose the other, they become friends. The conversation now turns on the comparative excellence of onion and garlic among the respective adherents, each praising his own favourite.

Enter Prajāpatideva to hasten the feasting. Ciñcā observes that there will be some delay as onion, garlic etc. have to be added to the dishes. But meantime Prajāpatideva says he would arrange the leaves for the feast and does it.

Behind the curtain is heard the voice extolling the smell of onion and garlic which, while driving away the Northerners has invited the Deccanis. Liṅgoji Bhaṭṭa obseeves and describes the brahmins of the feast Ciñcā now asks the other ladies to serve the food. One of the ladies had a lot of garlic tied up at her lap which now falls down.

Enter *Raktamūlikā* casting her eyes on Laśuna Panta. In his great joy Laśuna Panta tries to laugh but getting a spasm falls down in a swoon. Each one suggests and tries some remedy favourite to him, to infuse some energy into Laśuna Panta and help him to regain consciousness--the juice of onions, garlic, kañji, juice of Raktamūlikā and tamarind, Mithyākūṭa (tamarind-milk with *vendayam* etc.). The last one brought by *Mithyākūṭa Bhaṭṭa* really revives him and Laśuna Panta is announced as saved from death. Everybody praises the efficacy of the Mithyakūṭa fluid. But the moment Laśuna Panta regains consciousness he stretches out his hand for his favourite bag of garlic as an antidote for his biliousness. His younger brother says that *pitta* (bile) can be counteracted only by something sweet and suggests the juice of his own Gṛñjana. The brothers exchange for a while eulogies of Laśuna and Gṛñjana. Liṅgoji and others are glad that the rich, old son-in-law is revived and Raktamūlikā's marriage as well as

property have been secured. Perambhaṭṭa, the Purohita for the religious ceremony of Liṅgoji and Ciñcā already arranged for, arrives now with the necessary things. He is afraid that the fine smell of onion and garlic and the wafting of the breeze of their peelings would collect too much of a crowd. He arranges things for the ceremony. Ciñcā and Liṅgoji sit down for the same and in the same fire where the religious rite is to be done, Liṅgoji inhales the smoke of his own favourite things like tobacco, *Bhaṅg* etc. Pūrṇapolikā is shocked at the profanation of the ceremony and snatches from Ciñcā's hand her favourite thing Lakṣmanā which she was eating all the time.

Gṛñjanādri who has learnt that his marriage has been dropped and his old elder brother had been chosen, announces his resolve to commit suicide. One of the guests *Kavakāṅkura* prevents him from spoiling the occasion with the rash act. Kvathikā is also upset that Gṛñjana would remain unmarried, and finds fault with Pūrṇapolikā for going back upon her word.

Mithyākūṭa now observes that some Northerners were arriving; they do not like any of the dishes mentioned above and are generally highly critical of the local practices of the Deccanis.

Enter Bengali Bhaṭṭācāryas *Jhallarī-jhāṅkāra*, *Bherī-bhāṅkāra* etc. with a pupil. The pupil is carrying for the Guru's diet fish which is three days old. They are anxious to find a kitchen to cook the fish. Unfortunately he has to face the Deccani Pandits who enter into an argument with him on the unorthodox character of fish-eating. The Bengali cites some texts in support of their habits. The Deccani decides to punish the Bengali.

He brings an Official and some soldiers alleging that the Bengali was trying to perform some *tāntric* rite to kill them all and asks the official to beat him up. The soldiers take the Bengali away. The confusion is thus over; but as all this had proved a great disturbance, the Deccani Pandit announces that a more suitable auspicious day should be fixed for the garbhādhāna ceremony of Ciñcā and Lingoji. They all agree that a more auspicious day should be fixed.

Central Sanskrit University CENTRAL LIBRARY Campus